M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Sur. 667
Title : Siddhanta
Muktavali

667

667

सिद्धान्तमुक्तावलिः

Siddhānta Muktāvali		Title
Siddhanta Panchanana		Author
	Bhattāchārya.	Editor
		Year, Vols.
		Publisher
667		Remarks

× षष्ठोदकाः २

नन्वशुक्लरूप[illegible]त्वमेवेति कुतः कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न ॥ नी
लजनक[illegible]तापा ४ पृथिवीत्वजातर[illegible]भावात् जले नीलरूपासंभवात्
कालिंदीजले नीलत्वप्रतीतिस्वाश्रयौपाधिकी अतएव विपत्तिविक्षेप
धवलिमोपलब्धेः अथ जले माधुर्यं किं मानं न हि प्रत्यक्षेण कोपि रस
स्तत्रानुभूयते न च नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं तस्या
श्रयौपाधिकत्वात् अन्यथा बीजेरकरवीरादौ रसांतरोपलब्धेरम्लादि
मपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जलरसव्यंजकत्वात् न च हरी
तक्यामेव जलोष्मसंयोगा रसांतरोत्पत्तिरिति वाच्यं कल्पनागौरवात् पृ

थिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जलेनाम्लादिकं जंबीरसादौ तु आश्रयो
२६ पाधिकी तथा प्रतीतिः एवं जन्यशीतस्पर्शजनकतावच्छेदकं जलत्वं जन्यजल
त्वं वा बोध्यं घृष्टचंदनादौ तु शैत्योपलब्धिचंद्रांतवर्ती शीतलतरसलिलस्य ते
जसंयोगाज्जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासंभवात् स्नेह
स्तत्रेति घृतादावपि तदंतवर्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारण
त्वात् तेन जल एव स्नेह इति मंतव्यं द्रवत्वं इति सांसिद्धिकद्रवत्वं जातिविशे त्व ४
षः प्रत्यक्षसिद्धः स्तद्वच्छिन्नतज्जनकतावच्छेदकमपि तदेवेति भावः ४ तैलादा
वपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यते प्रथमवदि श्रीकृष्ण
ति पृथिव्या इवेत्यर्थः तथाहि जलं द्विविधं नित्यमनित्यं च परमाणुरूपं नित्यं ॥ २६

द्व्यणुकादिकं सर्वमनित्यं अवयवसमवेतं च ॥ अनित्यमपि त्रिविधं शरीरेंद्रि
यविषयभेदात् ॥ पृथिवीतोयो विशेषमाह ॥ किंत्विति ॥ अयोनिजमि
ति ॥ अयोनिजमेवेत्यर्थः ॥ जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्ध
मिति ॥ इंद्रियं रसनं जलीयमित्यर्थः ॥ तथाहि ॥ रसनं जलीयं गंधाद्यव्य
जकत्वे सति रसव्यंजकत्वात् ॥ सक्तुरसाभिव्यंजकोदकवत् ॥ वायूपनीत
४ व शीतभागद्वारसनसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयं ॥ विषयं दर्श
यति ॥ सिंधुर्हिमादिरिति ॥ सिंधुः समुद्रः ॥ हिमं तुषारः ॥ आदिपदा
त्सरित्कासारकरकादि ॥ सर्वोपि ग्राह्यः ॥ न च हिमकरकयोः कठि
नत्वात् ॥ पार्थिवत्वमिति वाच्यं ॥ उष्मणा विलीनयोस्तयोर्जलत्वस्य प्रत्यक्ष

मुक्ता॰
१
१८

सिद्धत्वात्॥ यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेः जलोपादानोपादेयत्वं
सिद्धं॥ अदृष्टविशेषेण द्रव्यत्वप्रतिरोधात्॥ करकायां॥ काठिन्य
प्रत्ययस्य भ्रांतत्वात्॥ तेजो निरूपयति॥ स्पर्श उष्ण इत्यादिना॥ उष्णत्वं
स्पर्शनिष्ठो जातिविशेषः॥ प्रत्यक्षसिद्धः इत्थं च जन्योष्णस्पर्शसमवा
यिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः तस्य परमाणुवृत्तित्वं तु ज
लत्वस्येवानुसंधेयं॥ न चोष्णस्पर्शवत्त्वं चंद्रकिरणावव्याप्तं इति वा
च्यं॥ तत्राप्योष्णरूपस्य सत्वात्॥ किंतु तदंतःपाति जलस्पर्शेना
भिभवात्तदग्रहः एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्च क्षु

श्रीकृष्णः
१८

कृष्णा॰
रादौ चानुद्भूतत्वात्तदग्रहः॥ स्नपमित्यादि॥ वैश्वानरे मरकतकिरणादौ च
पार्थिवरूपेणाभिभवात्॥ शु[illegible]ग्रहः स्तद्रूपाग्रहे धर्मिणोपि चाक्षुषत्वं न
स्यादिति चेन्न॥ अन्यदीयरूपेणैव धर्मिणो ग्रहसंभवात्॥ शंखस्येव
पित्तपीतिम्नावह्नेस्तु शुक्लरूपं नाभिभूतं किंतु तदीयं शुक्लत्वमभिभूत
मित्यन्ये॥ नैमित्तिमिति॥ सुवर्णादिरूपे तेजसि तत्सत्वात्॥ न च नैमित्ति
कद्रवत्वं दहनादावव्याप्तं॥ घृ[illegible]नादावतिव्याप्तं चेति वाच्यं॥ पृथि
व्यवृत्तिनैमित्तिकद्रवत्वावृत्तिजातिमत्वस्य विवक्षितत्वात्॥ पूर्ववदिति॥ ज
लस्येवेत्यर्थः॥ तथाहि॥ तद्द्विविधं॥ नित्यमनित्यं च॥ नित्यं परमाणुरू

पं॥ तदन्यद नित्यं अव वीच॥ तच्च त्रिधा॥ शरीरेंद्रिय विषयभेदात्॥ शरीरं अयोनि
जमेवेति॥ तच्च सूर्यलोकादौ प्रसिद्धं अत्र यो विशेषस्तमाह॥ इंद्रियमिति॥ ननु च
क्षुषस्तेजसत्वे किं मानं॥ इति उच्यते। चक्षुस्तेजसं परकीय स्पर्शाद्यव्यंजकत्वे
सति परकीयरूपव्यंजकत्वात्॥ प्रदीपवत्॥ प्रदीपस्य स्वीयस्पर्शव्यंजकत्वात् आ
द्यं परकीयेति॥ घटादेस्वीयरूपव्यंजकत्वात्॥ व्यभिचारवारणाय द्वितीयं परकी
येति॥ अथवा प्रभाया दृष्टांतत्वसंभवादाद्यं परकीयेति न देयं॥ चक्षुःसन्निकर्षे
व्यभिचारवारणाय द्रव्यत्वं देयं॥ विषयं दर्शयति॥ वह्नीति॥ ननु सुवर्णस्य तैजसः
त्वे किं मानमिति चेन्न॥ सुवर्णं तैजसं असति प्रतिबंधके अत्यंतानलसंयोगेप्य
नुच्छिद्यमानद्रवत्वात्॥ यन्नैवं तन्नैवं यथा पृथिवी॥ न चाप्रयोजकं पृथिवी द्र

श्रीरामः
१९

स्य१

वत्वस्य जलद्रवत्वस्य चाग्निसंयोगेनाशत्वात् नन्वनुपीतिमगुरुत्वाश्रयः पार्थिवस्यापि
तदानीं द्रवत्वात्तेन व्यभिचार इति चेन्न॥ जलमध्यस्थमसिक्तोदवत् तस्याद्रवत्वात्॥
अपरेत्वनुपीतिमाश्रयस्य अत्यंताग्निसंयोगेपि रूपापरावृत्तिदर्शनात् तत्प्रति
बंधकं विजातीयद्रवत्वं कल्प्यते तथाहि अग्निसंयोगेपीतिमगुरुत्वाश्रयः
द्रव५ विजातीयरूपप्रतिबंधकद्रव्यसंयुक्तः अत्यंताग्निसंयोगेपि पूर्वरूप
विजातीयरूपानधिकरणत्वात् जलमध्यस्थपीतपटवत् तस्य च पृथि
वीजलभिन्नस्य तेजस्त्वनियमात् वायुं निरूपयति अपाकज इति अनु
ष्णाशीतस्पर्शमपि सत्वादुक्तं अपाकज इति अपाकजस्पर्शस्य जला
दावपि सत्वादुक्तं अनुष्णाशीत इति एतेन वायवीयो विजातीयस्पर्शो द

पृथिव्यां

॥२०॥ र्शितःनजूनकनावछेदकंवायुलिंगमिति भावः॥एषवायुःस्पर्शादिलिंग
कःवायुर्हिशब्दध्वनिकंपेरनुमीयतेविजातीयस्पर्शनविलक्षण
शब्दनस्पर्शादीनांध्वन्यादीनांकंपनेनचवायोरनुमानात्॥यथा
चक्षुर्नग्रह्यश्चस्तथाअग्रेवक्ष्यते॥एवंवदिति॥वायुर्द्विविधः॥
नित्योनित्यश्चपुरमाणुरूपोनित्यत्वदयोनित्यःसमवेतःश्च॥सोपि
त्रिविधःशरीरेंद्रियविषयभेदात्तत्रशरीरमयोनिजंपिशाचा
दीनांपरंतुजलीयंतैजसःवायवीयशरीराणांपार्थिवभागोपरं
धकस्यादुपभोगक्षमत्वं॥जलादीनांप्रधान्याज्जोलीयत्वादिकमिति॥
अत्रयोविशेषस्तमाह॥देहव्यापीति॥शरीरव्यापकंस्पर्शत्वाद्
कमिंद्रियंबरूनश्चवायवीयंरूपादिशून्यंस्पर्शस्यैवव्यंजकद्रव्यतः॥ श्रीरामः

अभि

॥२०॥

॥२१॥ गसंगिसलिलस्यैवाभिव्यंजकंयज्जलवायुवत्॥विषयंदर्शयति॥आद्यादिर्
तिरायद्यपिअनियोवायुश्चतुर्विधस्तस्यचतुर्विधाप्राणादिरित्युक्तमा
करे॥तथापिसंक्षेपादत्रत्रैविध्यमुक्तंप्राणस्त्वकएवकंठादिनानास्थान
वशा॥स्यनिर्गमादिनानाक्रियावशाच्चनानासंज्ञोलभतइति आका
शंनिरूपयति आकाशस्येति आकाशकालदिशामेककव्यक्तित्वात्॥
आकाशत्वादर्कनजातिः आकाशत्वंशब्दाश्रयत्वं वैशेषिकादिकं
यद्गुविशेषगुणीतरव्यवच्छेदायतेनप्रमाणादकमावेदयितुं तथा
हि शब्दोगुणश्चक्षुर्ग्रहणायोग्यात्क्रियाजन्यत्वाज्जातिमत्वात्॥
स्पर्शवत्॥शब्दोद्रव्यसमवेतःगुणत्वात्संयोगवत्तस्यानुमानंशब्द

श्रीरामः

स्पर्शवत्समवेतत्वसिद्धेः ॥ शब्दोनस्पर्शविशेषगुणः अग्निसंयोगासमवायिकारण
कलाभावेसति अ० कारणगुणपूर्वकप्रसिद्धत्वात्सुखवत् ॥ पाकजरूपादि
व्यभिचारवारणाय ॥ प्रसिद्धेति नादिकालमनोगुणैः विशेषगुणवत्वात्सु
खवत् ॥ इत्थं चशब्दाधिकरणेनवमद्रव्यं गगननामकंसिद्ध्यतीति ॥ नचवाच्यव
येवपुरुषेणशब्दकर्मणावायोकारणगुणपूर्वकेण शब्दउत्पद्यतीतिकिंवा
र्थं ॥ अपाद्यद्रव्यनाशवेलनाय विशेषगुणत्वाभावात् ॥ नचपूरीरस्यविषयसमवा
यादिन्द्रियंदर्शयति ॥ द्वौदिशौ [illegible] मिति ॥ नचाकाशैलाघवादेकंसिद्ध्यति ॥ ज्ञात्वापुरु
षसंख्यादिनीकथमाकाशैस्यात् ॥ अतआह ॥ एकःसन्नपीति ॥ आकाशात्मकःसन्न
पिउपाध्येःकर्णशष्कुल्यादेर्भिन्नोभिन्नोश्रोत्रात्मकोभवतीत्यर्थः ॥ कालीनिरूपयति
जन्यानामिति ॥ तत्रप्रमाणंदर्शयितुमाह ॥ जगतामिति ॥ तथाहिद्रव्यंक्षणंघटादिरिति ॥ क्षीरस्य ॥
सूर्यपरिस्पंदादर्वाग्यादिविषयीकरणेतदासूर्यपरिस्पंदेनानाघटादेःसंबंधोवाच्यः ॥ २२

अंगसंगिसानिलरौक्षाभिव्यंजकव्यंजनपतनवत् ॥ विषयंदर्शयति ॥ आणादिरिति ॥ यद्यपिअ
भिन्नोवायुश्चतुर्विधः तत्रचतुर्थोविधाआणादिरित्युक्तमाकरे ॥ तथापिसंक्षेपादेवंत्रै
विध्यमुक्तं ॥ आणस्त्वेकएव ॥ हृदादिनानास्थानवर्तीतु ॥ मुखनिर्गमादिक्रियावशा
च्चनानासंज्ञांलभते ॥ आकाशंनिरूपयति ॥ आकाशस्येति ॥ आकाशाकाशदिशोरपि
केकथंचिल्लाघवादाकाशत्वादिकंनदारुणिः ॥ आकाशत्वेसतीत्यादि ॥ वैशेषिकेकर्ण
नैतुविशेषगुणांतरव्यवच्छेदाय ॥ एतेनशब्दाग्रहणमपदुरितं ॥ तथाहि ॥ शब्दस्तु
णः श्रवणप्रत्यक्षत्वेसत्यबहिरिंद्रियग्राह्यजातिमत्त्वात् ॥ स्पर्शवत् ॥ शब्दःसमवेत
गुणत्वादित्यनुमानेनशब्दस्यसमवेतत्वसिद्धेः ॥ शब्दोनस्पर्शवत्विशेषगुणः

×इतिई

॥ अग्निसंयोगासमवायिकारणाकत्वाभावेसतिअकारणगुणपूर्वकत्वात् ॥
२१ ॥ रूपवत्तत्संयोगजरूपादिरूपादिव्यभिचारकारणायसतुते ॥ परंरूपादिव्यभिचारवा ॥
॥ रणायअकारणगुणपूर्वकेति ॥ जलपरमाणौरूपादौव्यभिचारवारणायप्रत्यक्षेति ॥
॥ नाद्रिक्तजलमनोरुपा ॥ विशेषगुणत्वात् आत्मविशेषगुणः ॥ बाह्येंद्रियागोग्यत्वात् रूपवत् ॥
॥ इत्यंचराद्यधिकरणंनवमंद्रव्यंगगननामकंसिद्धतीति ॥ नचवाय्वग्नयवयुस्तृक्षराद्यकरणवोधो
॥ कास्मागुणपूर्वकः शब्दः उत्पद्यतामितिवाच्यं ॥ अयावद्द्रव्यभावित्वेनवायुविशेषगुणत्वाभावात् ॥
॥ तत्रत्वदादीत्यस्य विषयस्यचाभावात् ॥ इंद्रियंदुरुपयति ॥ इंद्रियमिति ॥ नन्वाकाशंलाघवाद्वैकमस्तु ॥
॥ त्रैपुरुषभेदात् भिन्नंकथमाकाशंस्यादतआह ॥ एकःसन्नपीति ॥ आकाशः एकसन्नपीउपाधेः कृ
॥ णीदाकुन्याभेदात् भिन्नंभोत्रंभवतीत्यर्थः ॥ काव्यैनिरूपयति ॥ जन्यानांजनकइति ॥ तत्रप्रमाणंदुर्ग ॥ राम १
धितुमाह ॥ जगतोमात्रयइति ॥ इदानींघटइत्यादिजतीतिः सूर्यपरिस्पंदादिरूपंविषयीकरोतितदासूर्यपरिस्पंदादिनाघ २१
टादेः संबंधोवाच्यः ॥ १ ॥

सचसंयोगादिर्नभवतीतिकालएतेसंबंधघटकःकल्प्यते इत्यंचतस्याश्रय
त्वंसत्यक्रमसाधारणंतरंदर्शयति ॥ तत्परत्वेति परत्वादिबुद्धेरसाधारणंनि
मित्तंकालएव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयत्वाल्लाघवाद
तिरिक्तःकल्प्यतइतिभावः ननुएकस्यकालस्यसिद्धौक्षणादिनमास
पर्यंतौवर्षादिसमयभेदेनस्यादतआह क्षणादिरिति कालःस्वको
पिउपाधिभेदात्क्षणादिर्विषयः उपाधिस्तुस्वजन्यविभागप्रागभावा
वच्छिन्नंकर्म पूर्वसंयोगावच्छिन्नविभागोवापूर्वसंयोगनाशावच्छि

मुक्ता०

२१

न्नोत्तरसंयोगप्राग्भावोवा उत्तरसंयोगावच्छिन्नं कर्म वा नचोत्तरसंयोगा
नंतरं क्षणव्यवहारो नस्यादिति वाच्यं ॥ कर्मांतरसत्वादिति महाप
लयेक्षणादिव्यवहारोपद्यस्ति तदानापत्याध्वंसो नैवोपपादनीय इति।
दिशं निरूपयति दूरांतिकेति दूरत्वं अंतिकत्वं च दैशिकपरत्वापरत्वं
च बोध्यं तद्बुद्धेरसाधारणं बीजदिगेव ॥ दैशिकपरत्वापरत्वयोरसवा
यिकारणसंयोगाश्रयतया दिक्सिद्ध्यतीति भावः ननु एकैव दि
क् तदा प्राच्यादिव्यवहारः कथमुत्पद्यतामिति जा[illegible]ह उपाधीति श्रीरामः

२२

यत्पुरुषस्य उदयगिरिसंनिहितायादिक्सा तस्य प्राची उदयगिरिव्यवहिता प्रतीची १
एवं तत्पुरुषीयसुमेरुसन्निहितादिगुदीची तद्व्यवहिता तु अवाची
सर्वेषामेव वर्षाणामेरूत्तरतः स्थितनियमात् आत्मानं निरूपयति ॥
आत्मेंद्रियेति आत्मत्वजातिस्तु सुखदुखादिसमवायिकारणतावच्छे
दकतया सिद्ध्यति। ईश्वरेपि सा जातिस्त्येव अदृष्टा[illegible]दिरूपकारणा
भावाच्च न सुखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव
नियम इत्यस्याप्रयोजकत्वात् अपरे तु ईश्वरे जातिर्नास्त्येव प्रमाणाभा
वात् नच दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादित्याहुः × अधि ष्ठाता

१×१ इंद्रियादीति

॥इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः॥ यद्यप्यात्म
नि अहं जानेऽहं सुखी सादिप्रत्यक्षविषयत्वमस्त्येव तथापि वि
प्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीति गोच
र इति प्रतिपादयितुं न शक्यते इत्यतः प्रमाणांतरं दर्शयति॥
करणं हि सकर्तृकमिति कुठारादीनां छिदादिकरणानां
कर्तारमंतरेण फलानुपधानं दृष्टं एवं चक्षुरादीनां ज्ञानक
रणानां कर्तारमंतरेण फलोपधान[illegible]नोपपद्यत इत्यति

मपि१

२फलोपधानेन दृष्टमित्यपि पाठः।

२ वास्यादीनामिति पाठः

श्रीराम॥

२३

॥॥रिक्तः कर्ता कल्प्यते ननु शरीरस्यैव कर्तृत्वं अस्तु अत आह॥॥
॥॥शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः इति॥ ननु चैतन्यं ज्ञानादि॥॥
॥॥कमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः॥॥
॥॥प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बा॥॥
॥॥ल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः शरीराणामवयवोप॥॥
॥॥चयापचयैरुत्पादविनाशशालित्वात् न च पूर्वशरीरोत्पन्नसं॥॥
॥॥स्कारेण द्वितीयशरीरे संस्कार उत्पद्यतामिति वाच्यं अनंत॥॥

प.३

मुक्ता०

स्तनमवेद ग्धे
शरीरा[illegible]वाघत

२४ ॥॥संस्कारकल्पनागौरवात् एवंशरीरस्यचैतन्येबालकस्यस्तन्येप्र॥॥
॥॥वृत्तिर्नस्यात् इष्टसाधनताज्ञानस्यतद्धेतुत्वात् तदानीमि॥॥
नु३ ॥॥ष्टसाधनत्वाभावकाभावात् मन्मतेजन्मांतरानुभूतेष्टसा॥॥
॥॥धनत्वस्यतदानींस्मरणादेवप्रवृत्तिः नचजन्मांतरानुभूतम॥॥
॥॥न्यदपिस्मर्येतइतिवाच्यं उद्बोधकाभावात् संस्कारनाशा॥
॥॥द्वा) अत्रत्वनायत्याजीवनादृष्टमेवोद्बोधकंकल्प्यते इसी॥ श्रीराम४

२४

चसंसारस्यानादितयाआत्मनोनादित्वसिद्धौअनादिभावस्य
नाशासंभवात् नित्यत्वंसिध्यतीत्यपिबोध्यं ननुचक्षुरादीनांज्ञा
नादौकरणीकर्तृत्वंचास्तुविरोधेसाधकाभावादतआह त
थात्वंचेदिंद्रियाणांउपघातेकथंस्मृतिः तथात्वंचैतिन्यंउ
पघातेकथंनाशेसतिअर्थाच्चक्षुरादीनामेवकथमिति पू
र्वंचक्षुषासाक्षात्कृतानांचक्षुषोभावेस्मरणंनस्यात् अनु

नवितुरभावात् अन्येनानुभूतस्यान्येनस्मरणायोगात् अनुभव
स्मरणयोः सामानाधिकरण्येनकार्यकारणभावादितिभावः न
नुचक्षुरादीनांचैतन्यंमास्तुमनसस्तु नित्यस्यस्मरणंस्यादत
आह मनोपिनतथा नतथानचेतनं ज्ञानाद्यनध्यक्षंतदाभवे
त् मनसोणुत्वात् प्रत्यक्षेचमहत्त्वस्यहेतुत्वात् मनसिज्ञान
सुखादिसत्त्वेनप्रत्यक्षानुपपत्तेरित्यर्थः यथामनसोणु श्रीरामः

त्वंतथाग्रेवक्ष्यते नचस्तुविज्ञानमेवात्मा तस्यस्वतःप्रकाश
रूपत्वाच्चेतनत्वंज्ञानसुखादिकं तस्यैवाकारविशेषः तस्यापि
भाव्यत्वादेवक्षणिकत्वंपूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानहेतुत्वात्सुषुप्ताव
थालयविज्ञानधारानिराबाधैव मृगमदवासनायावसनइवपूर्वपू
र्वविज्ञानजनितसंस्काराणांउत्तरोत्तरविज्ञानेसंक्रांतत्वान्नानुप
पत्तिः स्मरणादेरितिचेन्न तस्यास्वप्रकाशत्वेप्रमाणाभावात्
अन्यथाघटादीनामपिविज्ञानत्वापत्तिः नचेष्टापत्तिः विज्ञा

२× तस्यजगद्विषयत्वे सर्वज्ञत्वापत्तेः यत्किंचिद्विषयत्वे विनिगमकाभावः सुषुप्तावपि
विषयावभासप्रसंगात् तदानीनिराकाराचित्संतिरनुवर्तत इतिचेन्न ॥×२

मुक्ता॰
२६

मा

नव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं घटादेरनुभूयमानस्या
पलपितुमशक्यत्वात् आकारविशेष एवायं विज्ञानस्येति
चेत्॰ किमयमाकारोतिरिच्यते विज्ञानात्तर्हि समायातं विज्ञानव्य
तिरिक्तेन नातिरिच्यते चेत्तर्हि समूहालंबनेनीलाकारोपि पीता
कारः स्यात्॰ स्वरूपतो विज्ञानस्याविशेषात्॰ अपोहरूपो नी
लत्वादिर्विज्ञानधर्म इति चेन्न॰ नीलत्वादीनां विरुद्धानां एकस्मि
न्नसमावेशात्॰ इतरथा विरोधावधारणस्यैव दुरुपपादत्वात्

श्रीरामः
२६

वा

न वासनासंक्रमः संभवति॰ मातृपुत्रयोरपि वासनासंक्रमप्रसंगा
त्॰ न चोपादानोपादेयभावो नियामक इति वाच्यं वासनाया
संक्रमासंभवात् उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न तदुत्पा
दकाभावात्॰ चित्तामेवोत्पादकत्वे तदानंत्यप्रसंगात् क्षणिक
विज्ञानेष्वतिशयविशेषः कल्प्यत इति चेन्न मानाभावात्॰ क
ल्पनागौरवाच्च एतेन क्षणिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तं॰
गौरवादतिशयमानाभावाच्च॰ बीजादावपि सहकारिसमवधा

श्रीगणेश
जानम

मुक्ता॰

२८

नासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनात् अस्तु तर्हि क्षणि
कविज्ञानेषु गौरवान्नित्यं विज्ञानमेवात्मा अविनाशी वा अरेयमा
त्मा सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतेश्चेन्न तस्य सविषयत्वाभाव
स्य दर्शितत्वात् निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयत्व
स्याप्यननुभवात् अतो ज्ञानभिन्नो नित्य आत्मा इति सिद्धं सत्यं
ज्ञानमिति ब्रह्मपरं जीवेषु नोपयुज्यते ज्ञानाज्ञानसुखित्वासुखित्वा
दिभिर्जीवानां भेदसिद्धौ सुतरां ईश्वरभेदः अन्यथा बंधमोक्षा
नुपपत्तेः योपीश्वराभेदबोधको वेदः सोपि तद्भेदेन

श्रीराम॰

२८

नैदमेन तदीयत्वं प्रतिपादयन् स्तौति अभेदभावनैव यतितव्यं इति वदति
अत एव सर्वे आत्मानः समर्पिताः इति श्रूयते मोक्षदशायामज्ञाननिवृत्तौ अभे
दो जायेत इत्यपि न भेदस्य नित्यत्वेन नाशायोगात् भेदनाशेपि द्वयं स्यास्यत्येव
न च द्वित्वमपि नश्यतीति वाच्यं न च निर्धर्मके ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपे
दिवद्वित्वाभावेपि द्वयात्मकौ ताविति सुवचत्वात् मिथ्यात्वाभावोधिकरणा
त्मकः तत्र सत्यत्वमिति वत् एकत्वाभावो व्यक्तिद्वयात्मकः द्वित्वमप्युच्यतां प्र
त्येकं एकत्वेपि पृथिवीजलयोर्न गंधः इतिवत् उभयं नैकं इत्यस्य सर्वजनसिद्धत्वा
त् योपि तदानीं अभेदप्रतिपादकः आगमः सोपि निर्दुःखत्वादिना साम्यं प्र

व्यक्ति २

तिपादयति संपदाधिक्ये पुरोहितोयं राजा संवृत्त इतिवत् अत एव निरंजनः
परमं साम्यं उपैति श्रूयते ईश्वरोपि न ज्ञानसुखात्मा किंतु ज्ञानाद्याश्रयः
नित्यं विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदज्ञानाद्याश्रय एव उक्तः यः स
र्वज्ञ इत्याद्यनुरोधात् आनंदमित्यस्य आनंदवादित्यर्थः आनंदोपि दु
खाभावेन उपचर्यते भाराद्यपगमे सुखी संवृत्त इतिवत् असुखं त
स्मिन् आनंदः न त्वसावानंदः असुखमिति श्रुतेः न विद्यते सु
खं यस्येति कुतो नार्थ इति चेत् न क्लिष्टकल्पनापत्तेः प्रकरणविरो
धाच्च आनंदः इत्यत्र मत्वर्थीयप्रत्ययविरोधाच्चेति संक्षेपः एतेन

प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किंतु चेतनः कार्यकारण
योरभेदात्कार्यनाशे सति कार्यरूपतया नाशोपि न स्यादित्यकारणत्वं त
स्य बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनं बुद्धिश्च प्रकृतेः
परिणामः सैव महत्तत्त्वं अंतःकरणमित्युच्यते तत्सत्त्वासत्त्वाभ्यां पु
रुषस्य संसारापवर्गौ तस्या एवेंद्रियप्रणालिकया परिणतिर्ज्ञान
रूपा घटादिना सह संबंधः पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभि
मानश्च भेदाग्रहात् ममेदं कर्तव्यमिति मंदशः पुरुषोपरागो बु
द्धेः ~~[illegible]~~ स्वच्छतया चेतनप्रतिबिंबादतात्त्विकोदर्पणस्येव

सुखोपरागः इदमिति विषयोपरागः इंद्रियप्रणालिकया परिणतिरहंतास्मि
कः निश्वासाभिहतदर्पणस्येव मलिनिमा कर्तव्यमिति व्यापारवैधुर्यनिरा
शयवती बुद्धिः तत्परिणामेनात्मनः पुरुषस्यात्मिकः संबंधोदर्पणमलिन्ये
वमुखस्योपलब्धिरुच्यते ज्ञानवत्सुखदुःखेच्छाप्रयत्नधर्माधर्मसंस्का
रेष्वेव कृतिसामानाधिकरण्येन प्रतीतिः नचबुद्धिश्चेतनापरिणामिनी
तु घृतिमतः अपास्तकृत्यदृष्टभोगानामिवचेतन्यस्यापि सामानाधिक
रण्येन प्रतीतिः तद्धि लोभाभावात् चेतनाकरणीतिप्रतीतेश्च
तन्यांशेऽत्रमतिचित् कृत्यंशेपिकिन्नथते अन्यथाबुद्धर्निरंशलोपा

भावो ऽनित्यत्वेनपूर्वसंस्कारोपपत्तेः ज्ञेवेतनायाः प्रकृतेः कार्यत्वादुद्भ
रचैतन्यं कार्यकारणयोः स्वात्म्यादितिचेन्न सिद्धेः कर्तृजन्य
त्वमात्मनोवात् वीतरागजन्मादर्शनादनादित्वं अनादेर्नाशासंभवा
न्नित्यत्वं तत्किंप्रकृत्यादिकल्पनेन नचप्रकृतेः क्रियमाणानिगुणेः
दृष्टजन्यैः इच्छादिभिः कर्तात्मैवेत्यस्यतदर्थत्वात् नैवंसतिकर्तार
मात्मानंकेवलंतुल्य इत्यादिवक्ष्यमाणभगवता प्रकृतीकृतायमुपपद्यते
इतिसंक्षेपः धर्माधर्माश्रयइति आत्मेत्युपपद्येत शरीरस्यतदाश्रयत्व
देहांतरकृतकर्मणां देहांतरेणायोगानुपपत्तेः विशेषगुणयोगइति यो

प्रकृतेरदृष्ट
गुणैः ४५

कर्माणि स
र्वशः अहं
कारविमूढ
त्मा कर्ताहं
मिति मन्य
ते प्रकृतेर्न
विरोधश्चेत्
या व्यै

मुक्ता०

३०

परात्मानुमी
यतइत्याह

ग्यविशेषगुणसंबंधेनात्मनः प्रत्यक्षं भवति नत्वन्यथा अहंज्ञानेऽहंक
रोमीत्यादिप्रतीतेः प्रवृत्त्यादिरिति अयमात्मा परदेहादौ प्रवृत्त्यादिना
ऽनुमीयते प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहेऽभावस्य उक्तप्रा
यत्वात् चेष्टायाश्च प्रयत्नसाध्यत्वात् चेष्टया प्रयत्नवानात्मानुमीयतेति
भावः तत्र दृष्टांतमाह रथगत्येव सारथिरिति यद्यपि रथकर्म चेष्टा न भ
वति तथापि तेन कर्मणा सारथिर्यथाऽनुमीयते तथा चेष्टात्मकेन कर्म
णा परात्मापीति भावः अहंकारस्याश्रयोयमिति अहंकारोऽहमिति
प्रत्ययः तस्याश्रयो विषयः आत्मा न शरीरादिरिति मनो [redacted]
इति॥

श्रीरामः

३०

मनोभिन्नेंद्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः रूपाद्यभावेनेंद्रियागोग्यत्वात्।
विभुरिति। विभुत्वं परममहत्परिमाणवत्त्वं। तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तं॥ बुद्ध्यादीति॥
बुद्धिसुखदुःखेच्छादयश्चतुर्दश गुणाः पूर्वमुक्ता वेतितव्याः। अत्रैव प्रसंगाद्बुद्धेः कति॥
पयं बुद्धेः प्रपंचं दर्शयति॥ बुद्धिस्तु द्विविधेति। द्वैविध्यं व्युत्पादयति। अनुभूतिरिति॥
प्रत्यक्षमिति। इंद्रियजन्यं ज्ञानं प्रत्यक्षं। यद्यपि मनोरूपेंद्रियजन्यं सर्वमेव ज्ञानं तथापि इं
द्रियत्वेन रूपेणेंद्रियाणां यत्र ज्ञानेकरणत्वं तत्प्रत्यक्षमिति विवक्षितं। ईश्वरप्रत्यक्षं
तु न लक्ष्यं॥ इंद्रियार्थसंनिकर्षोत्पन्नमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्य
क्षमिति सूत्रे तथैवोक्तत्वात्। अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षं। अनुमितौ व्याप्तिज्ञा
नस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणेऽनुभवस्य करण

ज्ञानतज्जातिव्याप्तिश्च इदंलक्षणमीश्वरप्रत्यक्षसाधारण्यात्। परामर्शजन्यत्वं
नुमितिः। यद्यपि परामर्शः प्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यत्वविशि
षयकंज्ञानंअनुमितिः। नचकाचित्कत्वेविषयकेनुमितेअव्याप्तिरितिवा
च्यम्। तादृशज्ञानस्यानुभवत्वेव्याप्यजातिमत्त्वस्यविवक्षितत्वात्। अथवाव्याप्ति
ज्ञानकरणकंज्ञानमनुमितिः। एवंसादृश्यज्ञानकरणकंज्ञानमुपमितिः। श
पदज्ञानकरणकंज्ञानंशाब्दबोधः। वस्तुतोयत्किंचिदनुमितिर्व्यक्तिमादाय
वक्ष्यतद्व्यक्तिवृत्तिजातिमत्त्वंअनुमितित्वं। एवंयत्किंचित्प्रत्यक्षादित्वंव्यक्तिमादाय
व्यक्तिवृत्त्यनुभितित्वंवृत्तिजातिमत्त्वंप्रत्यक्षादिकंवाच्यं॥ प्रत्यक्षादिविभजते॥ज्ञाना

प्रसङ्गात्

राम
३१

॥जन्येति॥ घ्राणजंरसनंचाक्षुषंत्वगादिनंश्रोत्रंमानसमितिषड्विधंप्रत्यक्षं॥
॥ननेश्वरप्रत्यक्षस्याविभुत्वान्न्यूनत्वं॥जन्यप्रत्यक्षस्येवनिरूपणीयत्वात्॥
॥ऊहस्तत्रानुसारात्॥गोचरइति॥ग्राह्यइत्यर्थः॥गंधत्वादिरित्यः॥
॥द्विपदाद्यसुरभित्वादिपरिग्रहः॥गंधस्यप्रत्यक्षत्वाच्चद्रव्यजातिरपि।
॥प्रत्यक्षा॥गंधाभावग्रहेतुघ्राणस्यनसामर्थ्यमितिबोध्यं। तथाच॥
॥सइतिः॥रसत्वादिसहितइत्यर्थः॥तथारूपत्वादिसहितइत्यर्थः॥॥
॥गंधोरसश्चोद्भूतोबोध्यः॥उद्भूतरूपमिति॥स्पर्शोष्णादानुद्भूतमिति॥

(मु० न० ३२) नतत्प्रत्यक्षं॥ नहीति उद्भूतरूपवति॥ योग्येति। इषुकादिकमपियोग्यव्यक्तिवृत्ति
बोध्यं॥ तादृशःयोग्यइतिवित्यर्थः। चक्षुर्योग्यत्वमेवकथंतदाक्षाग्राह्यतीति। आ
लोकसंयोगउद्भूतरूपंचचाक्षुषप्रत्यक्षेकारणं। तत्रद्रव्यचाक्षुषंप्रतिनयोःसमवा
यसंबंधेनकारणत्वं। द्रव्यसमवेतप्रत्यक्षेस्वाश्रयसमवायसंबंधेनेति। उद्भूतस्परविनाद्रव्यचाक्षुषे ५ संबंधेन ४
समवेत स्यरूपलाभेःप्रत्यक्षेस्वाश्रयसमवायसंबंधेनेति। उद्भूतस्परविनाद्रव्यंचक्षुषेगोच्च
रत्वं॥ तोपिउद्भूतस्पर्शोद्भूतस्पर्शवाद्रिति। तस्मादन्येति। रूपभिन्नसप्तमा
भाग ४ द्विभिन्नं। चक्षुषोयद्योग्यं। नचेंद्रियस्यापिग्राह्यं। तथाचषट्पदार्थसंख्याद्वोध ३२
चक्षुर्ग्राह्यगुणाः उक्ता एवंक्रियाएवंजातयोयोग्यद्रव्यसंबंधेनचाक्षुषाइति॥
५ अत्रापितेंद्रियजन्येपिप्रत्यक्षेरूपंकारणं। तथाचबहिरिंद्रियजन्यद्रव्यप्रत्यक्षेरूपंकारणमिति॥

५१ बहिरिंद्रियजन्य मात्रे
नवीनास्तु ५ द्रव्यप्रत्यक्षेनरूपंकारणं॥ प्रमाणाभावात्। किंतुचाक्षुषप्रत्यक्षेरू
पंकारणं। स्पर्शनप्रत्यक्षेस्पर्शकारणं॥ अन्वयव्यतिरेकात्॥ बहिरिंद्रियैर्द्रव्य जन्य २
प्रत्यक्षेमात्रेकिंकारणमितिचेन्न॥ किंचित्॥ जातावतिप्रसंगविनिगमविरह
गुणेचाश्रयाङ्गमरूपस्य कारणत्वलाघवमितिचेत्॥ वायुस्त्वगिंद्रि
येणाग्रहणप्रसंगात्॥ इष्टापत्तिरितिचेत्॥ स्पर्शेकारणं अस्तुत्वचायाःअतो बलाघवात्
प्रत्यक्षत्वंतुइष्टापत्तिरित्यपिकिंनस्यात्॥ तस्मात्त्वक्चक्षुषीतिवत्। वायुं
स्पर्शेनिनीषतापुरुषप्रयत्नसंस्कारोपपत्तेः। अतोद्रव्यंस्वबहिरिंद्रियप्रत्यक्षमा रिंद्रियजन्य
त्रेतुन रूपस्यनवास्पर्शस्यापूर्तिरस्ति॥ वायुप्रत्यक्षकारकंरूपंकुत्रि
द्वक्तादिकमपिकुचित्संख्यापरिमाणादिचेन्न॥ त्वचायो

गादिति॰ त्वङ्मनःसंयोगज्ञानसामान्यकारणमित्यर्थः॰ किंतच्चप्रमा
णं॰ सुषुप्तिकालेत्वचस्काप्युत्तरोत्तरवर्त्तिनानमनस्काज्ञानोङ्गीमिति॰ न
नुसुषुप्तिकालीकज्ञानेनाविष्यति॰ अनुभवस्मरणरूपा॰ नाथः॰
अनुभवसामग्र्याभावात्॰ तथाहि॰ प्रत्यक्षंचक्षुरादिनास्त्वमनःसंयोग
स्यहेतुत्वात्॰ तन्नावाक्त्वनचाक्षुषादेस्तस्यज्ञानादर्शनाभावादवनमान
सप्रत्यक्षं॰ ज्ञानाद्यभावेचआत्मनोपिनप्रत्यक्षमितिव्याप्तिज्ञानाभावा
दनुमितिः॰ सादृश्यज्ञानाभावान्नोपमितिः॰ यद्ज्ञानाभावान्न
शाब्दबोधः॰ इत्यनुभवसामग्र्याभावान्नानुभवः॰ उक्तसंस्कारवान्न
स्मरणं॰ एवं॰ सुषुप्तिप्राक्कालोत्पन्नेत्वक्त्वसंबंधेनात्मनश्च

प्रत्यक्षप्रसंगात्तदानीन्तनेमानाभावात्॰ सुषुप्तिप्राक्कालेनिर्वि
कल्पकमेवनियमेनजायतेरस्यात्रप्रमाणाभावात्॰ अथात्मानमा
त्रेत्वङ्मनःसंयोगस्यपदिकारणत्वेतदाससनचाक्षुषादिप्रत्यक्ष
कालेत्वाचमस्यक्षंस्यात्॰ विषयत्वंसंयोगस्यत्वङ्मनःसंयोगस्यच
सेवात्॰ परस्परप्रतिबंधादेकंमपिवानस्यादिति॰ अत्रकेचित्॰
एवंनास्युक्त्वङ्मनोयोगस्यहेतुत्वेसिद्धेचाक्षुषादिसाम्ग्याः
शीघ्रादिप्रतिबंधकत्वमनुसंधायकल्पनैतदिति॰ अन्येतुस्व
स्मनुसंधारवर्मनःसंयोगस्यज्ञानहेतुत्वंकल्प्यं॰ चाक्षुषादिप्रत्यक्ष

३४ कालेब्ध्न संयोगभावान्नवा चक्षुष्मति ॥ मनोग्राह्यं सुखदुःखमिच्छा
द्वेषौमतिः स्मृतिरिति ॥ मनोजन्यप्रत्यक्षविषयस्यर्थः ॥ मतिस्मृति ॥ स्मृतिः प्र
क्तः ॥ एवंसुखत्वादिकमपि मनोग्राह्यं ॥ एवमात्मापि मनोग्राह्यः ॥ किंतु
मनोमात्रस्यगोचरस्यनेनसूत्रेणोक्तं ॥ ज्ञानंयन्निर्विकल्पकंतद्दर्शनं
५ यो तदतीन्द्रियमिष्यते ॥ चक्षुःसंयुक्तेननरेघटइत्याकारकंघटत्वादिविशि
ष्टज्ञानंनसंभवति ॥ घटत्वंविशेषणस्यघटत्वादेर्ज्ञानाभावात् ॥ विशिष्टबु
द्धेर्विशेषणज्ञानस्यकारणत्वात् ॥ तच्चप्रथमतोघटघटत्वयोर्वैशिष्ट्या
नवगाहिज्ञानंजायतेनत्वनिर्विकल्पकं ॥ तच्चानिर्विकल्पकस्यनप्रत्यक्षं ३४
तथाहि ॥ वैशिष्ट्यानवगाहिज्ञानस्यप्रत्यक्षंनभवति ॥ घटमहंजानामीत्य सोम०

ह्येव२

नुभवात् तत्राद्यनिर्ज्ञानंप्रकारीभूयभासते · ज्ञानेघटःसत्रघटत्वंप्रकारोयःसएवविशे
षणमित्युच्यतेविशेषणंयाविशेषणतादिशेषणतावच्छेदकमित्युच्यते · विशेषणतावच्छे
दकप्रकारकज्ञानंविशिष्टवैशिष्ट्यज्ञानेकारणं · निर्विकल्पेकेचघटत्वादिकंनप्रकारीभूते
नघटत्वादिविशिष्टघटादिवैशिष्ट्यज्ञानंज्ञाननसंभवति · घटत्वाद्यप्रकारकंचघटा
दिविशिष्टज्ञानंननसंभवति · जात्यादिरिक्तपदार्थज्ञानस्याकिंचिज्जनकत्वात्तनिय
मात् · मत्संयुक्तेद्रव्येहत्विति · द्रव्यप्रत्यक्षेमत्संयुक्तसमवायसंबंधेनकारणं ॥ द्रव्य
समवेतानांगुणकर्मसामान्यानांप्रत्यक्षेस्वाश्रयसमवायसंबंधेन · द्रव्यसमवे
तसमवेतानांगुणत्वकर्मत्वरूपत्वादीनांप्रत्यक्षेस्वाश्रयसमवेतसमवायसं
बंधेनकारणमिति · इंद्रियमिति · अत्रापिषाङ्चक्षुषोक्तेयते · इंद्रियत्वंतुनजा

किंतुरा इतरो द्भूतविशेषगुणानाश्रयत्वेसतिज्ञानकारणमनःसंयोगाश्रयत्वं॥ आकाशादिवारणायसत्यंत उद्भूतवि
शेषगुणस्य श्रोत्रेसत्यशब्देनेति विशेषगुणस्य रूपस्य द्रव्यचक्षुषिसत्युद्भूतेति उद्भूतत्वंतुनजातिः शुक्लेतरा
दिनासंकरात्तेसतीति
तिः॥ पृथिवीत्वादिनासंकरात्॥ नचशुक्लत्वादिव्याप्यंनीलत्वमितिवाच्यं॥
उद्भूतरूपत्वादिनाचक्षुषोजनकत्वानुपपत्तेः॥ किंतुशुक्लत्वादिव्याप्यमनु
द्भूतत्वंनानातद्भावैकूटस्थ्योद्भूतत्वं॥ नचसंयोगात्तथात्वं॥ तथाचशुक्लेतरोद्भूतरू
पसंयोगादिश्चक्षुरादेरस्यतोविशेषइति॥ कालादिवारणायविशेषणत्वं॥ इ
द्रियावयवविषयसंयोगस्यापिव्यभिचारवारणायसाक्षात्जनकत्वादिंद्रियावयव
वारणायकालादेरूपाभावस्यसन्निकर्षघटकतयाकारणत्वेनचक्षुः
संयोगाश्रयस्यकालादेर्वारणायचमनःपदं॥ ज्ञानकारणेत्यपिवारे
तद्वारे

द्रव्यचाक्षुषं

उद्भूत

व्याप्यवृत्ति॥ करणमिति॥ असाधारण

५ वीपरमाणुनीलेनीलत्वंपृथिवी५

ॐकारः१ ॐकरणंसाधारणत्वंव्यापारवत्वंविषयेंद्रियसंबंधेव्यापारःसोपिषड्विधः॥ व्यापारः
संनिकर्षः॥ सोपिषड्विधः॥ षड्विधंसन्निकर्षमुदाहरणद्वाराप्रदर्शयति॥ द्रव्यंग्रहइति॥ द्रव्य
प्रत्यक्षंइंद्रियसंयोगजन्यं॥ द्रव्यसमवेतप्रत्यक्षंइंद्रियसंयुक्तसमवायजन्यं॥ एवमग्रेपिव
क्तव्यं॥ तत्रप्रतिचक्षुःसंयोगः॥ द्रव्यसमवेतंचक्षुषंप्रतिचक्षुःसंयुक्तसमवायः॥ एवमन्यत्रापि
विशिष्यैवकार्यकारणभावः॥ परंतुपृथिवीपरमाणौपृथिवीत्वंचक्षुषाकथंनगृह्यते॥ तत्रपरंप
रयाउद्भूतरूपसंबंधस्यमहत्वसंबंधस्यचविद्यमानत्वात्॥ तथाहिनीलत्वंजातिरेकैव
व्यक्तिनीलेपरमाणौनीलेचवर्त्ततेतथाचमहत्वसंबंधोघटनीलमादायवर्त्ततेरूपसंबं
धस्तुउभयमादायैववर्त्ततेएवंपृथिवीत्वेपिघटादिकमादायमहत्वसंबंधोबोध्यएवं
बोधोतदीयस्पर्शादौचसत्तायाश्चाक्षुषप्रत्यक्षंस्यात्॥ तस्मादुद्भूतरूपावच्छिन्नमहत्वा
वच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतप्रत्यक्षेतादृशचक्षुःसंयुक्तसमवेतसम

वायस्यद्रव्यसमवेतसमवेतप्रत्यक्षेकारणत्वंवाच्यं। इत्थंचपरमाणुनीलादौननीलत्वा
दिग्रहः। परमाण्वुच्चक्षुःसंयोगस्यमहत्वावच्छिन्नत्वान्नेभावात्। एवंवाय्वादौनसत्तादिग्राहक
संयोगस्यरूपानवच्छिन्नत्वात्एवंयत्रघटस्यदृष्टावच्छेदेनालोकसंयोगश्चक्षुःसंयोगस्त्व
ग्रावच्छेदेनतत्रघटप्रत्यक्षाभावात्आलोकसंयोगानवच्छिन्नत्वंचक्षुःसंयोगेविशेषणं
बोध्यं। एवंस्पार्शनप्रत्यक्षेत्वक्संयोगः करणं। द्रव्यसमवेतस्पार्शनप्रत्यक्षेत्वक्संयु
क्तसमवायः। द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षेत्वक् संयुक्तसमवेतसमवायः। अ
त्रापिमहत्वावच्छिन्नत्वंऊद्भूतस्पर्शावच्छिन्नत्वंपूर्ववदेव बोध्यं। एवंगंधप्रत्यक्षेघ्रा
णसंयुक्तसमवायः। गंधसमवेतस्य घ्राणजप्रत्यक्षेघ्राणसंयुक्तसमवेतसमवायः।
रसप्रत्यक्षेरसनसंयुक्तसमवायः। रससमवेतस्परासनप्रत्यक्षेरसनसंयुक्तस
मवेतसमवायः कारणं। राद्धप्रत्यक्षेश्रोत्रावच्छिन्नसमवायः। शब्दसमवेतश्रावणप्र राम:
३६

क्षे १ त्यक्षेश्रोत्रावच्छिन्नसमवेतसमवायः। अत्रसर्वत्रलौकिकप्रत्यक्षंबोध्यं। वक्ष्माणमलौ
किकप्रत्यक्षेंद्रियसंयोगादिकंविनापिभवति। एवंआत्मप्रत्यक्षेमनःसंयोगः आत्म
समवेतमानसप्रत्यक्षेसंयुक्तसमवायः। आत्मसमवेतसमवेतप्रत्यक्षेमनः
संयुक्तसमवेतसमवायः कारणं। अभावप्रत्यक्षेसमवायप्रत्यक्षेचेंद्रियसं
बंधेविशेषणतांहेतुः। वैशेषिकमतेतुसमवायोनप्रत्यक्षः। तथापिविशेषणतानि
यामातथाहि। तलादौघटाद्यभावः संयुक्तविशेषणतयासंख्यादौचरूपाद्य
भावः संयुक्तसमवेतविशेषणतयो। संख्यात्वादौचरूपत्वाद्यभावः संयुक्तस
मवेतसमवेतविशेषणतयो। शब्दभावः कर्णशष्कुल्याश्रोत्रावच्छिन्नविशेषणतयो
कादौखत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतयो। एवंकत्वावच्छिन्नाभाव
खत्वाभावादिकंविशेषणतविशेषणतयो। घटाभावादौपटाद्यभावः संयुक्तवि रा

शेषणविशेषणतयो(एवमन्यदप्यूह्यं)तथापिविशेषणतात्वेनैकैवसागण्यते(अन्य
न्यथाबोढासंन्निकर्षइतिप्राचांग्रंथादौप्रवादोव्याहन्येतेति)।यदित्यादिति।अभाव
प्रत्यक्षेयोग्यानुपलब्धिःकारणं।तथाहि।भूतलादौघटादिज्ञानेजातेघटाभावादिकं
नज्ञायते।तेनाभावोपलंभेप्रतियोग्युपलंभाभावःकारणं।तत्रयोग्यताप्यपेक्षि
तासाचप्रतियोगिसत्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा।तदर्थश्च प्रतियोगि
नोघटादेःसत्वप्रसक्त्याप्रसंजितःउपलंभरूपःप्रतियोगीयस्यसउपलंभाभावोऽ
भावप्रत्यक्षेहेतुः।तथाहि।यत्रालोकसंयोगादिकंवर्त्ततेतत्रयद्यत्रघटःस्यात्।तर्हि
उपलभ्येतेत्यापादयितुंशक्यते।तत्रघटाभावादिकप्रत्यक्षंभवति अंधकारेतुना
पादयितुंशक्यते।तेनघटाभावादेरंधकारेनचाक्षुषंप्रत्यक्षं।स्पार्शनप्रत्यक्षंतुभ
वत्येव।आलोकसंबंधंविनापिस्पार्शनप्रत्यक्षस्यापादयितुंशक्यत्वात्।गुरुत्वादि

कंयदयोग्यंतदभावस्तुनयोग्यः।तत्रगुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात्।
वायौउद्भूतरूपाभावः पाषाणेसौरभाभावःगुडेतिक्ताभावःश्रोत्रेशब्दाभावःआ
त्मनिसुखाभावएवमादयस्तन्नादिंद्रियैर्गृह्यंते।तत्रतत्तत्प्रत्यक्षस्यापादयितुंशक्य
त्वात्।संसर्गाभावप्रत्यक्षेप्रतियोगिनोयोग्यता।अन्योन्याभावप्रत्यक्षेअधिकर
णयोग्यत्वमपेक्षितं।अतःस्तंभादौपिशाचादिभेदोपिचक्षुषागृह्यतएव।प्रत्यक्षं
लौकिकभेदेनद्विविधं।तत्रलौकिकप्रत्यक्षेघटादौसन्निकर्षाउक्ताः।अलौकिकस
न्निकर्षानिदानींवदति।अलौकिकइति।व्यापारःसंनिकर्षः।सामान्यलक्षणइति।
सामान्यंलक्षणंयस्येत्यर्थः।तत्रलक्षणपदेयदिस्वरूपमुच्यते।तदासामान्यस्व
रूपंप्रत्यासत्तिरित्यर्थोलभ्यते।तच्चइंद्रियसंबद्धविशेष्यकज्ञानेप्रकारीभूतंबोध्यं।तथा
हि।यत्रइंद्रियसंयुक्तोधूमादिस्तद्विशेष्यकंधूमइतिज्ञानंतत्रज्ञानेधूमत्वंप्रकारभूतंतत्र

लौकिका

ज्ञानं

धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमविषयकं ज्ञानं जायते। अत्र यदींद्रिय
संबद्धमित्येवोच्यते। तदा धूलीपटले धूमभ्रमानंतरं पटलं धूमविषयकं ज्ञानं न स्यात्। तत्र
धूमत्वेन सह इंद्रियसंबंधाभावात्। मन्मते तु इंद्रियसंबद्धं धूलीपटलं तद्विशेष्यकं धूम इ
ति ज्ञानं तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः। इंद्रियसंबंधश्च लौकिको ग्राह्यः। इदं च बहिरिंद्रिय
स्थले मानसस्थले तु ज्ञानप्रकारीभूतसामान्यं संन्निकर्षः। परंतु समानानां भावः सामान्यं।
तच्च क्वचिदनित्यं धूमत्वादि क्वचिदनित्यं घटादि यत्र एको घटः संयोगसंबंधेन भूतले स
मवायसंबंधेन कपाले वा ज्ञातः तदनंतरं च सर्वेषां तद्घटवतां भूतलादीनां कपालानां
वा ज्ञानं भवति तत्रेदं बोध्यं। परंतु सामान्यं येन संबंधेन ज्ञायते तेन संबंधेनाधिकरणानां
प्रत्यासत्तिः। किंतु यत्र तद्घटनाशानंतरं घटवतः स्मरणं जातं तत्र सामान्यलक्षणया
सर्वेषां तद्घटवतां भानं न स्यात्। सामान्यस्य तदानीमभावात्। किंच। इंद्रियसंबद्धवि

२सत्वात् सर्वेषां घटवतां। तोन२

शेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इंद्रियसंबंधं विनापि तादृशज्ञानप्रकारीभू
तसामान्येन ज्ञानं कुतो जन्यते। तस्मात्सामान्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह। आ
सत्तिरिति। इत्यर्थः। सामान्यज्ञानमिति। तथा च सामान्यलक्षणा इत्यत्र लक्षणशब्दस्य वि
षयोर्थः। सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति लभ्यते। ननु चक्षुःसंयोगादिकं वि
नापि सामान्यज्ञानं यत्र वर्त्तते तत्र सकलघटादीनां प्रत्यक्षं स्यात् तदेत्याह। अस्यार्थः
यदा बहिरिंद्रियेण सामान्यलक्षणया ज्ञानं जनीयं तदा यत्किंचिद्धर्मिणि। तत्सामान्यस्य
तदिंद्रियज्ञानसामग्री अपेक्षिता। सा च सामग्री चक्षुःसंयोग आलोकसंयोगादिकं।
तेनांधकारादौ चक्षुरादिना तादृशज्ञानं न जन्यते। ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञा
नरूपा सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यात्। अत आह। विषयीति। सा
मान्यज्ञानरूपा प्रत्यासत्तिस्तु तदाश्रयस्य। ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं

प्रत्यासत्तिरि

तेनं

तदिंद्रियज्ञा

न५

तस्यैव प्रत्यासत्तिरिति। अत्रायमर्थः। प्रत्यक्षे सन्निकर्षे विना भानं न संभवति तथा च सा
मान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च कथं भानं भवतु त
दर्थं सामान्यलक्षणा स्वीक्रियते। न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यं।
प्रत्यक्षे धूमे वह्निसंबंधस्य गृहीतत्वादन्यस्य धूमस्य चानुपस्थितत्वात् धूमो वह्निव्याप्यो
न वेति संशयानुपपत्तेः। मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालांतरीय
सं देशांतरीयधूमे वह्निव्याप्यत्वसंदेहः भवति। न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन
सकलप्रमेययज्ञाने जाते सार्वज्ञापत्तिरिति वाच्यं। प्रमेयत्वेन सकलज्ञाने जातेपि वि
शिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञापत्त्यभावात्। एवं ज्ञानलक्षणाया अस्वीका
रे सुरभिचंदनमिति ज्ञाने सौरभभानं कथं स्यात्। यद्यपि सामान्यलक्षणयापि सौर
भस्य भानं संभवति तथापि सौरभस्य भानं ज्ञानलक्षणया एवं मधूत्वेन धूलीपट

त

अभ्रमलिहार्थ

लं यत्र ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया। योगिनो द्विविधाः। युक्ता युं
जानाश्च। अतो योगजधर्मस्यापि द्वैविध्यं। युक्तस्य तावद्योगजधर्मसहायेन मनसाऽ
रा का परमाण्वादिनिखिलपदार्थगोचरज्ञानं सर्वदैव भवितुमर्हति। द्वितीयस्य चिं
ताविशेषोपि सहकारी। अनुमितिं व्युत्पादयति। व्यापारस्त्विति। अनुमायामनुमितौ
व्याप्तिज्ञानं करणं। परामर्शो व्यापारः। तथा हि येन पुरुषेण धूमे वह्निव्याप्तिर्गृहीता महानसादौ ५
पश्चात् स एव पुरुषः क्वचित्पर्वतादौ अनवच्छिन्नमूलां धूमलेखां पश्यति तदनंतरं
च धूमो वह्निव्याप्य इत्येवंरूपं स्मरणं तस्य भवति पश्चाद्वह्निव्याप्यधूमवानयं पर्व
इ २ त इति ज्ञानं भवति स एव परामर्शः त्युच्यते तदनंतरं पर्वतोयं जायते तदेवानुमितिरिति भा
वः। अत्र च प्राचीना वदंति। व्याप्यत्वेन ज्ञायमानं धूमादिकं लिंगमनुमितिकरणं। तद्दू
षयति। लिंगस्यानुमित्यकरणत्वे युक्तिमाह। अनागतादीति। यद्यनुमितौ लिंगं क

ज्ञायमानमिति

व्याप्ति ४

वह्निमानिति ज्ञानं २

रणंस्यात्तदा अनागतेनविनष्टेनवालिंगेनानुमितिर्नस्यात्। अनुमितिकरणस्यलिंग
स्यतदानीमभावादिति। व्याप्यस्येति। व्याप्तिविशिष्टस्यपक्षेणसहवैशिष्ट्यावगाहिज्ञा
नमनुमितौजनकं। तच्चव्याप्यपक्षेइतिज्ञानंपक्षोव्याप्यवानितिज्ञानंवा। अनुमितिस्तुप
क्षेव्याप्यइतिज्ञानात्। पक्षेसाध्यमित्याकारिका। पक्षोव्याप्यवानितिज्ञानात्पक्षःसाध्यवा
नितिद्विविधादपिपरामर्शात्पक्षःसाध्यवानित्येवानुमितिरित्यन्ये। ननुवह्निव्याप्यधू
ति मवान्पर्वतइतिज्ञानंविनापिपर्वतोधूमवानितिप्रत्यक्षंततोधूमोवह्निव्याप्यइतिस्मरणं
तत्रज्ञानद्वयादेवानुमितिर्दर्शनात्। व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानंसर्वत्रनका
रणंकिंतुव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनहेतुत्वंआवश्यकत्वात्।
विशिष्टज्ञानकल्पनेगौरवाच्चेतिचेन्न। व्याप्यतावच्छेदकाज्ञानेपिवह्निव्याप्यवा
नितिज्ञानादनुमित्युत्पत्तेःलाघवाच्चव्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनहेतुत्वं।

किंचधूमवान्पर्वतइतिज्ञानादनुमित्यापत्तिःव्याप्यतावच्छेदकीभूतधूमत्वप्रका
रकपक्षधर्मताज्ञानस्यसत्वात्। नचगृह्यमाणव्याप्यवच्छेदकप्रकारकपक्षधर्म
ताज्ञानस्यहेतुत्वंवाच्यं। चैत्रस्यव्याप्तिज्ञानेमैत्रस्यपक्षधर्मताज्ञानादनुमितिःस्यात्।
यदितुतत्पुरुषीयगृह्यमाणव्याप्यवच्छेदकप्रकारकंपक्षधर्मताज्ञानंतत्पुरुषीयानु
रि१ मितौहेतुरित्युच्यते। तदानंतकार्यकारणभावः। यदितुव्याप्तिप्रकारकंज्ञानंपक्षधर्म
ताज्ञानंचस्वतंत्रंकारणमित्युच्यते। तदाकार्यकारणभावद्वयं। वह्निव्याप्योधूमआलो
४ स्यात् कवान्पर्वतइतिज्ञानादनुमित्यापत्तिः। इत्थंचयत्रज्ञानद्वयंतत्रापिविशिष्टज्ञानंकल्प्य
तइतिफलमुखगौरवस्यादोषत्वादिति। व्याप्योनामव्याप्याश्रयः। तत्रव्याप्तिःकेत्यत
सं२ आह। व्याप्तिःसाध्यवदन्यस्मिन्नसंबंधउदाहृतः। वह्निमान्धूमादित्यादौसाध्यंवह्निः
साध्यवान्महानसादिःतदन्योजलह्रदादिःतदवृत्तित्वंधूमस्येतिलक्षणसमन्वयः।

धूमवान्वह्नेरित्यादौ साध्यवदन्यस्मिन्नपः पिंडादौ वह्नेः सत्वान्नातिव्याप्तिः अत्र ये
न संबंधेन साध्यं तेनैव संबंधेन साध्यवान्बोध्यः। अन्यथा समवायेन संबंधेन वह्नि
मान्वह्नेरवयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसंगात्।
साध्यवदन्यश्च साध्यवत्सामान्यभेदवान्बोध्यः। तेन यत्किंचिद्वह्निमतो महानसादे
र्भिन्नपर्वतादौ धूमस्य सत्वेपि न क्षतिः। येन संबंधेन हेतुता तेनैव साध्यवदन्यावृत्ति
त्वं बोध्यम्। तेन साध्यवदन्यस्मिन्धूमावयवे धूमस्य समवायसंबंधेन सत्वेपि न
क्षतिः साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वावच्छिन्नाभावः। तेन धूमवान्
वह्नेरित्यत्र साध्यवदन्यह्रदादिवृत्तित्वाभावेपि नातिव्याप्तिः। अत्र यद्यपि द्रव्यं कर्म गु
णकर्मान्यत्वविशिष्टसत्वादित्यादौ विशिष्टसत्तायाश्चैक्यात्साध्यवदन्यस्मिन्गुणादा
[illegible] ववृत्तित्वं नास्ति। तथापि हेतुतावच्छेदकरूपेणावृत्तित्वं बोध्यम्। हेतुताव

वं ५

गुणसत्ताया

४२

त्तिर्योग्यतेत्यादि। आसत्तिज्ञानं योग्यताज्ञानं आकाक्षाज्ञानं तात्पत्यज्ञानं शाब्दबोधे कार
णं। तत्र सत्तिपदार्थमाह। संनिधानं त्विति। यत्पदार्थेन सह यत्पदार्थस्यान्वयो अपेक्षि
तस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणं। तेन गिरिर्भुक्तमग्निमान्देवदत्तेनेत्या
दौ न शाब्दबोधः। तात्पर्यगर्भासत्तिः। नीलो घटो द्रव्यं पट इत्यत्रासत्तिभ्रमे आसत्तिभ्रमेण
शाब्दभ्रमाभावेपि न क्षतिः। न तु यत्र छत्री कुंडली वा सखी देवदत्त इत्याद्युक्तं तत्रोत्तरप
दस्मरणेन पूर्वपदस्मरणनाशादव्यवधानेन तत्तत्पदस्मरणासंभव इति चेन्न। प्रत्येक
पदानुभवजन्यसंस्कारैश्चरमं तावद्विषयकस्मरणस्याव्यवधानेनोपपत्तेः। नानासं
न्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्पत्तेरपि संभवात् तावत्पदसंस्कार
सहितचरमवर्णज्ञानस्योद्बोधकत्वात्। कथमन्यथा नानावर्णैरेकपदस्मरणं। परंतु
तावत्पदार्थानां स्मरणादेकदैव खल्वेकपोतन्यायात्तावत्पदार्थानां क्रियाकर्मभावेनान्व

शाब्दबोधः

परूपः शाब्दबोधोभवतीतिकेचित्। वह्नायुवानः शिशवः कपोताः खलेयतामीयुगपत्य
तंति। तथैवसर्वेयुगपत्यदार्थाःपरस्परेणान्वयिनोभवंति। परंतु। यद्यदाकांक्षितंयोग्यं
सन्निधानंप्रपद्यतेनतेनान्वितःस्वार्थःपदैरवावगम्यते। तथाचखंडवाक्यार्थबोधानंतरं
तथैवपदार्थस्मृत्यामहावाक्यार्थबोधइत्याहुः। इदंतुबोध्यं। यत्रद्वारामित्युक्तंतत्रापिघेही
त्यादिपदस्यज्ञानादेवतत्रबोधः। नतुपिधानादिरूपार्थज्ञानात्। पदजन्यतत्पदार्थोपस्थिते स
रत्रशाब्दबोधेहेतुत्वात्। किंचक्रियाकर्मपदानांतेनैवसाकांक्षत्वात्तेनक्रियापदंविना
चतुर्थ्यनुपपत्तेः। पदाध्याहारश्चावश्यकः। योग्यतांविनिर्वक्ति। पदार्थइति। एकपदार्थ
त्रपरपदार्थसंबंधोयोग्यतेत्यर्थः। तज्ज्ञानाभावाच्चवह्निनासिंचतीत्यादौनशाब्दबोधः।
नन्वेतस्यायोग्यतायाःज्ञानंशाब्दबोधात्प्राक्सर्वत्रनसंभवति। वाक्यार्थस्यापूर्वत्वादितेन
नातत्पदार्थस्मरणेसतिक्वचित्संशयस्यक्वचिन्निश्चयरूपस्यापियोग्यताज्ञानस्यसंभ

वात्। नवास्ति। योग्यताज्ञानं नशाब्दबोधेकारणं। वह्निनासिंचतीत्यादौसेके
द्वि २ वैकरणत्वाभावरूपायोग्यतानिश्चयेनप्रतिबंधान्नशाब्दबोधः। तदभाव
निश्चयस्यलौकिकसंनिकर्षजन्यदोषविशेषाजन्यतज्ज्ञानमात्रेप्रतिबंधक
त्वाच्छाब्दंप्रत्यपिप्रतिबंधकत्वंसिद्धं। योग्यताज्ञानलंबाच्छाब्दबोधविलंबो
सिद्धइत्याहुः। आकांक्षांनिर्वक्ति। तत्पदेनेत्यादियेनपदेनविनायत्पदस्या
न्वयाननुभावकत्वंतेनसहतस्याकांक्षेत्यर्थः। क्रियापदंनाकारकपदंनान्व वि ४
यबोधंजनयतीतितेनतस्याकांक्षा। वस्तुतस्तुक्रियाकारकपदानांसन्निधा
नमात्रसत्यान्वितार्थं। परंतुघटकर्मताबोधंप्रतिघटपदोत्तरद्वितीयारूपाकां
क्षाज्ञानकारणं। तेनघटकर्मत्वमानयनेकृतिरित्यादौनशाब्दबोधः। अयमेति

पुत्रेराज्ञःपुरुषोपसार्यतामित्यादौपुरुषेणसहराजपदस्यतात्पर्यग्राहकेनैवा
न्वयबोधः।पुरुषेणसहतात्पर्यग्रहेतुतेनसहान्वयःस्यादेवातात्पर्यंनिर्वक्तृ।
वक्तुरिच्छेति।यदितात्पर्यज्ञानंकारणंनस्यात्तदासैंधवमानयेदौक्वचिदन्व
यैक्वचिल्लवणस्यबोधइतिनस्यात्।नचतात्पर्यग्राहकाणांप्रकरणादीनां
शाब्दबोधेकारणत्वमस्तीतिवाच्यं।तेषामननुगमात्।तात्पर्यज्ञानजनकत्वे
नतेषामनुगमेतुतात्पर्यज्ञानमेवलाघवात्कारणत्वमस्तु।इत्थंचवेदस्थलेपिता
त्पर्यज्ञानार्थमीश्वरःकल्प्यते।नचतत्राध्यापकतात्पर्यज्ञानंकारणमितिवाच्यं।
२ दाव सर्गाध्यापकाभावात्।नचप्रलयएवतास्तिकुत्रासर्गादिरितिवाच्यं।प्रलयस्या
गमप्रतिपाद्यत्वात्।इत्थंचशुकवाक्येपीश्वरीयतात्पर्यज्ञानंकारणं।विसंवादि ५९

शुकवाक्येतुशिक्षयितुरेवतात्पर्यज्ञानंकारणं।अन्येतुनानार्थादौक्वचिदेवतात्पर्यज्ञा
नंकारणं।तथाचशुकवाक्यैविनैवतात्पर्यज्ञानंशाब्दबोधः।वेदेत्वनादिमीमांसापरि
शोधिततर्कैरर्थावधारणमित्याहुः।इतिशब्दपरिच्छेदः।पूर्वमनुभवस्मरणभेदाद्द्वे
द्वैविध्यमुक्तं।तत्रानुभवप्रकाराःदर्शिताःसुगमतयोदाहृतं।तत्रहिपूर्वानुभवःकार स्मरणं
चि५ णं।अत्रकैत्वं।अनुभवत्वेननकारणं।त्वंकिंतुज्ञानत्वेन।अन्यथास्मरणोत्तरंस्मरणं न४
नस्यात्।समानप्रकारकस्मरणेनपूर्वसंस्कारस्यविनष्टत्वात्।मन्मतेतुतेनैवस्मर
णेनसंस्कारांतरद्वारास्मरणांतरंजन्यतइत्याहुः।तन्न।यत्रसमूहालंबनोत्तरंघटपटा
दीनांक्रमेणस्मरणमजानिष्टासकलविषयकस्मरणंतुमाभूत्।तत्रफलस्यसं
स्कारनाशकत्वात्।कालस्यरोगस्यान्तरमफलस्यवासंस्कारनाशकत्वंवाच्यं।
तथाचनक्रमिकस्मरणानुपपत्तिः।नचपुनःपुनःस्मरणात्दृढतरसंस्कारानुपपत्तिः

सटित्सु बोधक्रमस्यावधानस्यौदार्यपदार्थत्वात्। नचविनिगमनाविरहादेवज्ञात्वे ना १
नापिजनकत्वंस्यादिति। विशेषधर्मेणव्यभिचाराज्ञानेसामान्यधर्मेणामन्यथा
सिद्धत्वात्। कथमन्यथादंडस्यभ्रमिहारइमंरूपेणनकारणत्वं। नचांतरालिकस्म
स्मरणानांसंस्कारनाशकत्वसंशयाद्व्यभिचारकसंशयइतिवाच्यं। अनंतसंस्का
रतंन्नाशकल्पनापत्त्यास्मरस्मरणस्यैवसंस्कारनाशकत्वकल्पनेनव्यभि
रसंशयाभावात्। इदानींक्रमप्राप्तंमनोनिरूपयितुमाह। साक्षात्कारइति। एतेनम
न्निप्रमाणंदर्शितं। तथाहि। सुखंसाक्षात्कारःसकरणकःज्ञानसाक्षात्कारत्वात्। चाक्षु
षसाक्षात्कारादिवदित्यनुमानेनकरणस्यमनसःसिद्धिः। नचैवंद्युःखादिसाक्षा
त्कारणमपिकरणांतरात्सिद्धिरितिवाच्यं। लाघवादेकस्यैवसकलसाक्षात्कार
करणतयासिद्धेः। एवंसुदीनामसमवायिकारणसंयोगाश्रयतयामनसःसिद्धि ध्रु०
ख्या ज्ञा०४

बोध्यया। मनसोनुणुत्वेप्रमाणमाहायौगपद्यादिति। ज्ञानांचाक्षुषरासनादीनांयौ
गपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धंतत्रनानेंद्रियाणांसत्यपिविषयसंनिधा
नेयस्संबंधादेकेंद्रियेणज्ञानमुत्पद्यतेतदसंबंधाच्चापरैर्ज्ञानंनोत्पद्यते। तन्मनसो
विभुत्वेवासंनिधानंनसंभवतीतिनाविभुमनः। नचतदानीमदृष्टविशेषाबोद्बोधवि
लंबादेवतज्ज्ञानविलंबइतिवाच्यं। तथासतिचक्षुरादीनामपिक्रकल्पनापत्तेः।
नचदीर्घांगुलीभ्रमणादीनानावधानभाजांचक्रमेकदानानेंद्रियजज्ञानमिति
वाच्यं। मनसोनिलाघवात्झटितिनानेंद्रियसंबंधान्नानोत्पत्त्याउत्पलशतपत्र
नेदादाविवयौगपद्यप्रत्ययस्यभ्रांतत्वात्। नचमनसश्चसंकोचविकाशशालित्वाद्भ्र
यौवतिरस्तितिवाच्यं। नानावयवत्वन्नाशादिकल्पतेगौरवाल्लाघवान्निरवयस्याणुरूप
स्यैवमनसःकल्पनादितिसंक्षेपः॥इतिद्रव्यपदार्थःसमाप्तः॥ ॥द्रव्यंनिरूप्यगुणान्निरू

पयति। अथेत्यादिना। गुणत्वजातौ किं मानमिति चेत्। द्रव्यकर्मभिन्ने सामान्यवति या का
रणता सा किंचिद्धर्मावच्छेद्या। निरवच्छेद्यकारणतायाश्चासंभवात्। नहि रूपत्वादि
देश कं सत्तावा तत्रावच्छेदिका न्यूनाधिकवृत्तित्वात्। अतश्चतुर्विंशत्यनुगतं वाच्यं। तदे
वगुणत्वमिति द्रव्याश्रिता इति। यद्यपि द्रव्याश्रितत्वं लक्षणं कर्मादावतिव्याप्तेः। न
तथापि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः। भवति हि गुणत्वं द्रव्यत्व
व्यापकतानवच्छेदकं तद्वत्त्वं गुणानामिति। द्रव्यत्वं कर्मत्वं वा न द्रव्यत्वव्यापकताच्छेदकं।
त्व गगनादौ द्रव्यकर्मणोरभावात्। द्रव्यत्वं सामान्यत्वं वा द्रव्यत्वव्यापकतावच्छेदकजाति न
रिति तद्व्युदासः। निर्गुणा इति। यद्यपि निर्गुणत्वं कर्मादावपि। तथापि सामान्यवत्त्वे कर्मान्य
ण त्वे च सति निर्गुणत्वं बोध्यं। जात्यादीनां न सामान्यवत्त्वं कर्मणो न कर्मान्यत्वं। द्रव्यस्य निर्गुण
र्गुणत्वमिति न तत्रातिव्याप्तिः। निष्क्रिया इति। स्वरूपकथनं न तु लक्षणं। गगनादाव

तिव्याप्तिः रूपं परसदृतिवेगेन स्थितिस्थापकोप्युपलक्षणीयः मूर्त्तगुणा इति। अमूर्त्तेषु न
वर्त्तत इत्यर्थः अमूर्त्तगुणा इति मूर्त्तेषु न वर्त्तत इत्यर्थः उभयेषामिति। मूर्त्तामूर्त्तगुणा इत्यर्थः।
अनेकाश्रिता इति। संयोगविभागद्वित्वादीनि द्विवृत्तीनि त्रित्वचतुष्कादिकं त्रिचतुरादिवृत्ती बो
ध्यं। अतः शेषा इति। रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वं च परत्वापरत्वबुद्धिसुखदुः
खेच्छाद्वेषप्रयत्नागुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः इत्यर्थः। बुध्यादीति। बुद्धिसुखदुःखेच्छा
द्वेषप्रयत्ना इत्यर्थः। स्पर्शांता इति। रूपरसगंधस्पर्शा इत्यर्थः। द्रवः द्रवत्वं। वैशेषिका इति। वि
शेषा एव वैशेषिकाः स्वार्थे ठक्। विशेषगुणा इत्यर्थः। संख्यादीति। संख्यापरिमाणपृथक्त्व रि
च संयोगविभागपरत्वापरत्वानीत्यर्थः संख्यादिरपरत्वांतो द्रवत्वं स्नेह एव च। एते तु द्वींद्रियग्रा
ह्याः। चक्षुषा त्वचापि ग्रहणयोग्यत्वात्। अथ स्पर्शांतशब्दकाः। बाह्येति। रूपादीनां चक्षुरादि
ग्राह्यत्वात्। विभूनामिति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावशब्दा इत्यर्थः। अका

मुक्ताव०
६२

गुणे

रणेति। कारणेन कार्यगुणा उत्पद्यंते तेन कारणगुणपूर्वकत्वं कारूपादयो वक्ष्यंते। बुध्याद
यस्तु न तादृशाः आत्मादेः कारणाभावात्। पाकजरूपादीनां कारणगुणपूर्वकत्वाभावा
त् अपाकजा इत्युक्तं। तथाविधं अपाकजं। कारणगुणोद्भवा इति। तथा एकत्वमपि ध्यं। कर्मज
त्वं यद्यपि न साधर्म्यं घटादावतिव्याप्तेः संयोगेऽव्याप्तेश्च। तथापि कर्मजन्यवृत्तिगुणत्वव्या
प्त्यजातिमत्त्वं बोध्यं। एवमन्यत्रापि क्वचिदूह्यं। भवेदसमवायित्वमिति। घटादिरूपरस
गंधस्पर्शाः कपालादिरूपरसगंधस्पर्शेभ्यो भवंति। एवं कपालादिपरिमाणाद्यस
वायित्वं। शब्दस्यापि द्वितीयशब्दं प्रति। एवं स्थितिस्थापकैकत्वयोरपि ज्ञेयं। निमि
त्तत्वमिति। बुध्यादीनामिच्छादिनिमित्तत्वादिति भावः द्विधैवेति। असमवायिकारण
त्वं निमित्तकारणत्वं च। तथाहि। उष्णस्पर्श उष्णस्पर्शस्यासमवायी। कारणं पाकजो नि
मित्तं। गुरुत्वं गुरुत्वपतनयोरसमवायि अभिघाते निमित्तं। वेगो वेगस्यंदयोरस

६२

मवायि अभिघाते निमित्तं। द्रवत्वं द्रवत्वस्यंदयोरसमवायि। संग्रहे निमित्तं। भेरीदंड
संयोगः शब्दे निमित्तं। भेर्याकाशसंयोगो असमवायि। वंशदलद्वयविभागः शब्दे
निमित्तं। वंशदलाकाशविभागो असमवायि। प्रादेशिक अव्याप्यवृत्ति चक्षु
रिति। रूपत्वजातिस्तु प्रत्यक्षसिद्धा। रूपशब्दोल्लेखिः। नीप्रतीतिर्नास्तीति चेत्। मास्तु
रूपशब्दप्रयोगः। तथापि नीलपीतादिष्वनुगतजातिविशेष अनुभवसिद्ध एव।
एवं नीलत्वादिकमपि प्रत्यक्षसिद्धं। न चैकैका एव नीलारुणादिव्यक्तय इत्येकव्यक्ति
वृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यं। निलो नष्टः रक्तः उत्पन्न इत्यादिप्रतीतेर्नी
लादेरुत्पादविनाशशालितया नानात्वादन्यथा एकनीलनाशे जगदनीलमापद्येत।
न च नीलसमवायरक्तसमवाययोरेव नाशोत्पादविषयकोसौ प्रत्यय इति वाच्यं। प्रती
त्यासमवायानुल्लेखात्। न च स एवायं नील इति प्रत्यक्षाल्लाघवाच्चैक्यमिति वाच्यं।

प्रत्यक्षस्यतज्जातीयत्वविषयत्वात्। सैवेयंगुर्जरीतिवत्। लाघवंतुप्रत्यक्षबाधितंअन्य
थाघटादीनामप्येकप्रसंगात्। उत्पादविनाशबुद्धेःसमवायालंबनत्वापत्तिरिति। एते
नरसादिकंव्याख्यातं। चक्षुग्राह्यमिति। चक्षुग्राह्यविशेषगुणइत्यर्थः। एवमग्रेपिद्र
व्यादेरिति। उपलंभकंउपलब्धिकारणं। इदमेवविवृणोति। चक्षुषइति। द्रव्यगुणकर्मसा
न्यानांचाक्षुषप्रत्यक्षंप्रतिऊद्भूतरूपंकारणं। तद्रूपंशुक्लंनीलंपीतंरक्तंकृष्णंकबुरा
दिभेदादनेकप्रकारंभवति। ननुकबुरंकतमतिरिक्तंरूपं। इष्यते। नीलपीताद्यारब्धे
अवयवीनावयवीनीरूपोऽप्रत्यक्षत्वप्रसंगात्। नापिव्याप्यवृत्तिनीलादिरूपमुत्पद्य
तेपीतावच्छेदेनापिनीलोत्पत्तिप्रसंगात्। नाप्यव्याप्यवृत्तिनीलादिकमुत्पद्यते। व्या
प्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वेविरोधात्। तस्मान्नानाजातीयरूपैरवयविनिवि
जातीयंचित्ररूपमारभ्यते। अतएवैकंचि~~त्ररूपमारभ्यते अतएव~~मित्यनुरूपिनानारू

पकल्पनेतुगौरवात्। इत्थंचनीलादीनांपीताद्यारंभेप्रतिबंधकत्वकल्पनादवयवि
निनपीताद्युत्पत्तिः। एतेनरसेपिव्याख्यातः। रसादिकमनाव्याप्यवृत्ति। किंतुनाना
जातीयरवैदवयवैरारब्धअवयविनिरस्याभावपिनक्षतिः। तत्ररसनयाअवयवैरस
एवगृह्यतेरसनेंद्रियादीनांद्रव्यग्रहेसाभर्थ्याभावात्। अवयविनीरसेत्वेपिक्षतेर
भावात्। जलादीति। जलपरमाणौतेजःपरमाणौचरूपंनित्यंपृथिवीपरमाणुरू
पंतुनित्यं। तत्रपाकेनरूपांतरोत्पत्तेः। नहिघटस्यपाकांतरंतदवयवोपलभ्यते। नहिरकपालस्यकपालिकानीलावयवाभवति। एवंक्रमेणपरमाणावपिपा
कक्लिद्धे। अन्यत्। जलतेजःपरमाणुरूपभिन्नरूपंसहेतुकंजन्यं। रसंनिरूपयति।
सहकारीतिरासनज्ञानेरस। कारणमित्यर्थः। पूर्ववदिति। जलपरमाणोरसोनित्यः। अ
न्यःसर्वएवरसोऽनित्यइत्यर्थः। गंधंनिरूपयति। घ्राणग्राह्यइति। उपकारकइति। घ्राण

न्यः ज्ञानेकारणमित्यर्थः। सावोपिगंधो अनित्यएव। स्पर्शनिरूपयति। स्पर्शइति। उष्णकारइति। स्पार्शनप्रत्यक्षेस्पर्शः कारणमित्यर्थः। अनुष्णाशीतेति। पृथिव्याः वायोश्चस्पर्शोअनुष्णाशीतः। जलस्यशीतः। तेजसउष्णः। कठिनस्तुकुमारस्यस्पर्शोपृथिव्याद्येत्यर्थः। कठिनत्वादिकं तुनसंयोगगतोजातिविशेषः। चक्षुर्ग्राह्यतापत्तेः। पृथिवीतिजलतेजोवायुपरमाणुस्पर्शानित्यास्तद्भिन्नस्पर्शास्त्वनित्याइत्यर्थः। एतेषां। रूपरसगंधस्पर्शानां। नान्यत्रेति। पृथिव्यांहिरूपरसस्पर्शपरावर्त्तिः तेजःसंयोगादुपलभ्यते। नहिरातधापिभायमानेजलरूपादिकंपरावर्त्तते। नीरसौरभमौष्ण्यं वान्वयव्यतिरेकाभ्यामुपाधेरेवेतिनिर्णीयते। पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापिपृथिवीघ्रमिमध्येपरमाणुचेवपाकइतिवैशेषिकावदंतितेषामयमाशयः। अवयविनात्रावष्टब्धेष्ववयवेषुपाकोनसंभवति। परंतुवह्निसंयोगेनावयवेषुविनष्टेषुस्वतंत्रेषुपरमाणुषुपाकः पुनःप्रपक्वपरमाणुसंयोगाद्द्व्यणुकादिक्रमेणपुनर्महत्यवयविपर्यंतसृष्टिः। तेजस्वमतिरायिते वेगवशापूर्वव्यूहनोदाशटितिप्रकृतिरासतिष्ठति। अथद्व्यणुकादिविनाशमारभ्यैकतिनिःक्षयोः पुनरुत्पत्त्या पाठिमद्वतीति। दिष्यद्बुद्धिवोराद्यार्थजन्यया। नत्रेवि भागजविभागानंगीकारेनवक्षमा। तदंगीकारेविभागः किंचिद्

स्म १

एवं १ [redacted] रक्तोत्पत्तिकालंपरमाणवंरेकर्मचिंतनादष्टक्षणाइति। नैयायिकानामितिनैय्या यिकानांमितिद्व्यणुकादानयविन्यपिपाकोभवति। तेषामयमाशयः। जवफलंवनासछिद्रा त्वारवङ्गेःसूक्ष्मावयववैरंतःप्रविष्टैरवयवेष्ववष्टब्धेष्वपिपाकोनविरुध्यते। अनंतावयवतन्नाशकल्पनेगौरवंच। इत्थंचसोयंघटइत्यादिप्रत्यभिज्ञापिसंगछते। यत्तुनप्रत्यभिज्ञातत्रावयविनाशोपिस्वीक्रियतेःसंख्यांनिरूपयितुमाह। गुणनेति। गुणनव्यवहारासाधारणंसंख्येत्यर्थः। नित्येषुनित्यमिति। नित्येषुपरमाणवादिषुएकत्वंनित्यं। अनित्येषुद्व्यणुकत्वमनित्यमित्यर्थः। द्वित्वादयोव्यासज्यवृत्तिसंख्याअपेक्षाबुद्धिजन्याः। अनेकेति। यद्यपिद्वित्वंसंबंधःप्रत्येकंघटादावपिवर्त्ततेतथाप्येकोद्वावितिप्रत्ययाभावादेकोनद्वावितिप्रत्ययसद्भावाच्चद्वित्वादिपर्याप्तिलक्षणःकश्चनसंभ्युपेयते। अपेक्षाबुद्धिनाश्यत्वे [redacted] प्रथमंपेक्षाबुद्धिस्ततोद्वित्वोत्पत्तिःततोविशे

का ४

बंधोनेकाश्रयो २

दि ३

गां २ प्र १

षणज्ञानंद्वित्वनिर्विकल्पकात्मकंततोद्वित्वविशिष्टंप्रत्यक्षंअपेक्षाबुद्धिनाशाच्च
ततोद्वित्वनाशइति।यद्यपिज्ञानांतरंद्वित्वेणमात्रस्थापिवोग्यविभुविशेषगुणानांस्वात्म
वर्त्तिगुणेनाश्रयत्वात्।तथाप्यपेक्षाबुद्धेस्त्रिक्षणस्थायित्वंकल्प्यते।अन्यथानिर्विकल्पकका
लेऽपेक्षाबुद्धिनाशादनंतरंद्वित्वस्यैवनाशःस्यान्नतुद्वित्वप्रत्यक्षंतदानींविषयाभावा
द्विषमानस्यैवचक्षुरादिनाज्ञानजननोपगमात्।तस्माद्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्ना
शकंकल्प्यते।नचापेक्षाबुद्धिनाशात्कथंद्वित्वनाशइतिवाच्यं।कालांतरेद्वित्वप्रत्यक्षाभावा
दपेक्षाबुद्धिस्तदुत्पादिकातन्नाशःतन्नाशकइतिकल्पनात्।अतएवतत्पुरुषीयापेक्षा
बुद्धिजन्यद्वित्वादिकंतेनैवगृह्यतेइतिकल्प्यतेतेनचापेक्षाबुद्धेर्द्वित्वप्रेक्षाकारणत्वमस्त्विति
वाच्यं।लाघवेनद्वित्वंप्रतिकारणत्वस्यैवोचितत्वात्॥अतींद्रियेद्व्यणुकादावपेक्षाबुद्धिर्योगि
नांसर्गादिकालीनपरमाण्वादौईश्वरापेक्षाबुद्धिर्वेलांडांतरवर्त्तियोगिनामपेक्षाबुद्धि

वद्द्वित्वादिकारणमितिअपेक्षाबुद्धिकेत्येतत्आह अनेकेति।अयमेकंइत्याकारिकेत्यर्थः।परि
परिमाणंनिरूपयति।परिमाणमिति।परिमीयतेव्यवहारोसाधारणकारणंपरिमाणं
इत्यर्थः।तच्चतुर्विधंअणुमहद्दीर्घह्रस्वंच।तत्परिमाणंनित्यत्रपरिमाणमित्यनुषज्य
ते।जायतइत्यत्रापिपरिमाणमित्यनुवर्त्तते।अनित्यमितिपूर्वेणान्वितं।तथाचानित्यं
परिमाणंसंख्याजन्यंपरिमाणजन्यंप्रचयजन्यंचेत्यर्थः।तत्रसंख्याजन्यमुदाहरति।
द्व्यणुकादाविति।द्व्यणुकस्यत्रसरेणोश्चपरिमाणंप्रतिपरमाणुपरिमाणंद्व्यणुकप
रिमाणंवानकारणं।परिमाणस्यस्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात्।द्व्य
णुकस्याणुपरिमाणंतुपरमाणुत्वापेक्षयानोत्कृष्टंत्रसरेणुपरिमाणंतुनसजातीयं
अतःपरमाणोर्द्वित्वसंख्याद्व्यणुकपरिमाणस्यद्व्यणुकेत्वसंख्यात्रसरेणुपरि

माणस्यासमवायिकारणमित्यर्थः। परिमाणजन्यमुदाहरति। परिमाणंघटादाविति। घटादिपरिमाणं कपालादिपरिमाणजन्यं। प्रचयजन्यमुदाहर्तुं प्रचयंनिर्वक्ति। प्रचयइति। तन्नाशंनिरूपयति नाशइति अर्थात्परिमाणस्यैवपृथक्त्वं निरूपयति। संख्यावदिति। पृथक्प्रत्ययासाधारणंकारणंतान्नित्यनादिकंसंख्यावत्। यथाहिनित्येषुएकत्वंनित्यं। अनित्येअनित्यं। अनित्यमेकत्वमाश्रयद्वितीयक्षणेनोत्पद्यते। आश्रयनाशान्नश्यति। तथाएकपृथक्त्वमिति। द्वित्वादिवद्विपृथक्त्वादिकमपीत्यर्थः। नन्वयमस्मात्पृथगित्यादावन्योन्याभावोभासतेतत्कथंपृथक्त्वंगुणांतरंस्वीक्रियते। नचपृथक्त्वमेवास्तुनत्वन्योन्याभावइतिवाच्यं। रूपेनपटइतिप्रतीत्यनापत्तेः। नहिरूपेपटावधिकंपृथक्त्वंगुणांतरमस्ति। नवापटेपटावधिकंपृथक्त्वमस्ति। येनपरंपरासंबंधःकल्प्येतइत्यतआहअन्योन्याभावइतिविलक्षणेति। ननुसाहवैलक्षण्यंनत्वर्थवैलक्षण्यमितिचेन्न। विनार्थंघटेघटात्पृथगितिवद्घटोनेत्यत्रापिपंचमीप्र

३ यति नाशइति अर्थात्परिमाणस्यैवपृथक्त्वं निरूपयति

पृथक्त्वं ४

गुणक्रियाश्च ततोविभाग ३७ ततः पूर्वसंयोगनाशः ३८ ततोद्व्यारंभकसंयोग ३९ ततोद्व्यणुकोत्पत्ति ४०
अथरक्तोत्पत्ति ४१ मध्यमराद्धवत् एकस्मादपि संयोगान्नूतनारोत्पादोतावत्कालमवतिष्ठ २
ते स्यात्० किंचयदिउत्पादकोनाशकश्चतदानष्टरूपादौवह्निनाशेनीरूपक्षितिरूपपरमाणु
स्यात्० नाशकश्चेदुत्पादकस्तादृशकोसनोतदग्निनाशेरक्तसारतानस्यात्० परमा
ण्वंतरकर्मचिंतनासंचनादिक्षणेपिशुणोत्पत्ति ४१ तथाहि। एकत्रपरमाणोःकर्म १।
ततोविभाग २ ततोद्व्यारंभकसंयोगनाशः परमाण्वंतरकर्मणी ३ ततोद्व्यणुकनाशश्च
रमाण्वंतरकर्मजश्च विभाग ४ इत्येकः कालः १ ततः स्वसमादिनाशः विभागोऽपरप
र्वसंयोगनाशश्च ३ इत्येकः कालः २ ततोरक्तोत्पत्तिर्द्व्यारंभकसंयोग इत्येक कालः ३
अथद्व्यणुकोत्पत्तिः ५ अथरक्तोत्पत्तिः ५ द्व्यनाशस्मकालेपरमाण्वंतरकर्मचि
ततोद्व्यणुकोत्पत्ति ६ तथाहि। परमाणुकर्मणा परमाण्वंतरविभागः ततः आ

मुक्ता०

रंकसंयोगनाशः अथद्व्यणुकनाशपरमाण्वंतरकर्मणी१ अथश्यामनाशप
रमाण्वंतरकर्मज४विभागः२ततोरक्तोत्पत्तिः परमाण्वंतरपूर्वसंयोगनाशश्च३
ततः परमाण्वंरसंयोगस्ततोद्व्यणुकोत्पत्तिः५ अथरक्तोत्पत्ति४रिति६ एवं श्या
मनाशक्षणे परमाण्वंतरे कर्मचिंतनात्स[illegible]क्षणा॥ तथाहि॥ परमा
~~ण्वंतरे~~णौ कर्म। ततः परमाण्वंतरे४

५
राम४

संगात्। तस्माद्यर्थयोगे पंचमी सोर्थो न त्वर्थान्योन्याभावतो भिन्नो गुणांतरं कल्प्यत इति। संयो
गं निरूपयति। अप्राप्तयोरिति। तं विभजते कीर्तित इति। एषः संयोगः सन्निपातः संयोगः।
य द्वितीय उभयकर्मजः तृतीय इति संयोगज इत्यर्थः। तृतीयस्यादिदिति पूर्वेणान्वितं। आदिमं भि अ
घ ततः द्वितीयो नोदनाख्यः संयोगः विभक्तप्रत्ययासाधारणं कारणं विभागं निरूप त४
यति विभाग इति। एककर्मेति उदाहरणं तु श्येनशैलविभागादिकं पूर्ववद्बोध्यं। तृतीयः वत्६
विभागजः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति। आद्यस्तावत् यत्र
कपाले कर्म ततः कपालद्वयविभागः ततो घटा[illegible]रंभकसंयोगनाशस्ततो घटनाशस्त
तस्तेनैव कपालविभागेन स कर्मणः कपालस्याकाशादिविभागो जन्यते ततउत्तरदेशसं
ग२ योगनाशस्तत[illegible]कर्मनाश इति। न च तेन कर्मणैव कथं देशांतरविभागो न
जन्यत इति वाच्यं। एकस्य कर्मण आरंभकसंयोगप्रतिद्वंद्विविभागजनकत्वस्यानारंभक

मु०

वि

संयोगप्रतिद्वंद्विविभागजनकत्वस्य च विरोधात्। अन्यथा विकसत्कमलकुड्मलभंगप्रसंगा
त्। तस्माद्यदिदं अनारंभकसंयोगप्रतिद्वंद्विविभागं जनयेत्तदारंभकसंयोगप्रतिद्वंद्विविभा
३ न गं जनयेत्। न च कारणविभागेनैव पूर्वं कुतो देशांतरविभागो न जन्यत इति वाच्यं। आरंभक
संयोगप्रतिद्वंद्विविभागवतोऽवयवस्य सति द्रव्ये देशांतरविभागासंभवात्। द्वितीयस्ताव
त्। यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेपि विभक्तप्रत्ययो भवति तत्र च शरीरतरु
विभागे हस्तक्रिया न कारणं व्यधिकरणत्वात्। शरीरे तु क्रिया नास्ति। अवयविकर्मणोपा
न्तदवयवकर्मनियतत्वादतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति। अ
त एव विभागो गुणांतरमन्यथा शरीरे विभक्तप्रत्ययो न स्यादतः संयोगनाशेन विभागो नान्य
थासिद्धो भवति। परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति। परत्वं चापरत्वं चेति। दैशि
कमिति। दैशिकं परत्वं बहुतरसूर्यसंयोगांतरितत्वज्ञानादुत्पद्यते। एवं तदल्पीयस्त्वज्ञाना

दपरत्वमुत्पद्यते अत्रावधित्वार्थं तृतीयापक्षा। यथा पालिपुत्रात्काशीमपेक्ष्य प्रयोगः परः पा
टलिपुत्रात्कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति तयोर्दैशिकपरत्वापरत्वयोः समवायी असम
वायिकारणं तदाश्रये दैशिकपरत्वापरत्वाश्रये। दिवाकरेति। अत्र परत्वमपरत्वं च कालिकं
त्र४ ग्राह्यं। यत्सूर्यपरिस्पंदापेक्षया यस्य सूर्यपरिस्पंदो अधिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः
कालिकपरत्वापरत्वे जन्यद्रव्य एव। अत्र कालिकपरत्वापरत्वयोः एषां कालिकदैशिपरत्वा
परत्वानां॥ क्रमप्राप्तं बुद्धिं निरूपयितुमाह। बुद्धिरिति। अप्रमां निरूपयति। तच्छून्य इति तदभा
म४ वदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः। तत्प्रपंच अप्रमाप्रपंचः। आद्य इति विपर्यास इत्यर्थः।
रा३ शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकज्ञानं गौरोहमित्याद्याकारकं। एवं शंखादौ पीतः शंख
इत्याद्याकारकं ज्ञानं यन्निश्चयरूपं तद्भ्रम इति किंस्विदिति वितर्के। निश्चयस्य लक्षणमाह। न
दभावेति। तदभावात्प्रकारकं ज्ञानं निश्चयः। संशयं लक्षयति। संशय इति। एकधर्मिकं विरु

२ प्रकारकं यत्

मु०
द्वि

द्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। साधारणेति। उभयसाधारणो यो धर्मस्तज्ज्ञानं संश
यकारणं। यथा उच्चैस्तरत्वं स्थाणुसाधारणं ज्ञात्वा स्थाणुर्न वेति संदिग्धे। एवमसाधा
मपि रणधर्मज्ञानं कारणं यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे गृहीत्वा शब्दो नित्यो न वेति संदिग्धे
प्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणं शब्दव्याप्तिज्ञानादीनां निश्च
यमात्रजनकत्वस्वभावात्। किंतु तत्र शब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मानस ए
वेति। एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशयः। एवं व्याप्यसंशयादपि व्यापकसंशय द५
इत्यादिकं बोध्यं। किंतु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति। दोष इति।
अप्रमां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तत्र पित्तादिरूपा दोषा अननुगता
स्तेषां कारणत्वमन्वयव्यतिरेकादेव सिद्धं गुणस्य प्रमाजनकत्वं तु अनु
देव [illegible] मानात्सिद्धं। यथा प्रमा [illegible] ज्ञानसामा [illegible] कारणभिन्नकारणजन्याज

न्य

न२

द्वि

न्यज्ञानत्वादप्रमावत्। न च दोषाभाव एव कारणमस्त्विति वाच्यं। पीतः शंख इति स्थले
पित्तरूपदोषसत्वाच्छंखप्रमानुत्पत्तिप्रसंगात् विनिगमनाविरहादनंतदोषाभावका
रणत्वमपेक्ष्य गुणकारणतायान्याय्यत्वात्। न च गुणसत्वेपि पित्तेन प्रतिबंधात् शंखे
न श्वैत्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं। तथा च किं गुणस्य हेतुत्व
कल्पनेनेति वाच्यं। तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्व सिद्धेः। एवं भ्रमं प्रति
५ मि गुणाभावः कारणमित्यस्यापि सुवचत्वात्। तत्र दोषाः के इत्याकांक्षायामाह। पित्तेति। क्वचि
त्पित्तादिभ्रमेपि पित्तादिर्दोषः क्वचिच्चंद्रादेः स्वल्पपरिमाणभ्रमे दूरत्वदोषः क्वचिच्च वंशो
रगभ्रमे मंडूकवसांजनमित्येवं दोषा अननुगता एव भ्रांतिजनका इत्यर्थः। अथ के गुणा
इत्यपेक्षायां प्रत्यक्षादौ क्रमशो गुणान्दर्शयति। प्रत्यक्षे त्विति प्रत्यक्षे विशेषणवद्विशे
ष्यसंन्निकर्षो गुणः अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः एवमग्रेप्यूह्यं।

मु० ३ अथैवं स्मृतेरपि प्रमात्वं स्यादिति चेत्स्यादेव। तथा सति तत्करणस्यापि प्रमाणांतरत्वं स्यादिति चेन्न यथार्थानु ३
३ भवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात्। इदं तु बोध्यं। येन संबंधेन यद्विशिष्टं भवति तेन संबंधेन तद्वद्विशेष्यकं तेन संबंधे

६९

प्रमां निरूपयति। भ्रमभिन्नमिति। ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह अथवेति। तद्वद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमेत्यर्थः एवं सति निर्विकल्पकं प्रमा न स्यात्। तस्य सप्रकारकत्वाभावात् अत आह। न प्रमेति। ननु वृक्षे कपिसंयोगज्ञानं भ्रमः प्रमा च स्यादिति चेन्न प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात्। न च वृक्षे कपिसंयोगानवच्छेदकावच्छेदेन संयोगज्ञानं भ्रमो न स्यात् तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यं तत्र संयोगानवच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्। लक्ष्यस्यानुगमात् लक्षणाननुगमेपि न क्षतिः। प्रमात्वमिति। मीमांसकादिप्रमात्वं ग्राह्यमिति। तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यत इति। भेदानां मते तु ज्ञानमतींद्रियं ज्ञानजन्यातता प्रत्यक्षा तया च ज्ञानम

न

स्वतो २ वदंति २ ज्ञा १

ग्राहक १

८

नुमीयते। मुरारिमिश्राणां मते अनुव्यवसायेन ज्ञानं गृह्यते सर्वेषां मतेपि तज्ज्ञानविषयकज्ञानेन प्रमाण्यं गृह्यते। विषयनिरूप्यं हि ज्ञानमतो ज्ञानवृत्तिवेद्यो विषयः तन्मतं दूषयति न स्वतो ग्राह्यमिति। संशयेति। यदि ज्ञानप्रामाण्यं स्वतो ग्राह्यं स्यात् तदानभ्यासदशापन्नज्ञाने प्रामाण्यसंशयो न स्यात्। तत्र हि यदा ज्ञानं जातं तदा ज्ञानप्रामाण्यं ज्ञातमेवेति कथं संशयः। यदि तु ज्ञानं न जातं धर्मिज्ञानाभावात् कथं संशयः। तस्माज्ज्ञाने प्रामाण्यमनुज्ञेयं तथा हि। इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात्। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गंधवति पृथिवीत्वप्रकारकज्ञानत्वात्। एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात्। न च हेतुज्ञानं कथं जातमिति वाच्यं। पृथिवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात् तत्र गंधवद्विशेष्यकत्वस्यापि सुग्रहत्वात्। तत्प्रकारकावच्छिन्नतद्विशेष्यकत्वं परं गृह्यते संशयानुरोधात्। ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्विशेष्यकत्वं विशेषणं

तज्ज्ञान

५ तदा

गंधग्रहणे द्व २

ज ४ त्वा २ द्वं १ न

७०

व्यर्थं। न च रंगे रजतार्थिनः प्रवृत्तिर्भ्रमज्ञानस्यात्तवमते भ्रमस्याभावादिति वाच्यं। तत्र हि दो
नि२ षाधीनस्य पुरोवृत्तिस्वतंत्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात्। सत्यरजतस्थले तु विशि
ष्टज्ञानस्य सत्वात्तदेव कारणं अस्तु वा तत्रापि भेदाग्रह एव कारणमिति। न चान्यथाख्यातिः
संभवति रजतप्रत्यक्षकारणस्य रजतसन्निकर्षाभावात्। रंगे रजतबुद्धेरनुत्पत्तिरिति चेत्र। स
त्यरजतस्थले प्रवृत्तिप्रतिविशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात्।
ना न च संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ तु भेदाग्रहः कारणमिति वाच्यं। लाघवेन प्रवृत्तिमा
त्रे तस्य हेतुत्वकल्पनात्। इत्थं च रंगे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिक
ल्पनेपि न क्षतिः। फलमुखगौरवस्यादोषत्वात्। किंच पत्ररंगरजतयोरिमे रजते इति ज्ञानं
तत्र न कारणबाधोपि। अपि च पत्ररंगरजतयोरिमे रजतरंगे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृ
त्तिनिवृत्ती स्यातां रंगे रंगभेदग्रहे रजते रजतभेदग्रहे चान्यथाख्यातिभयात्त्वन्मते रंगे रंग

दे॰४

७०

भेदाग्रहस्य रजते रजतभेदाग्रहस्य च सत्वा। दोषादेव रंगे रजतभेदाग्रहस्य रजते रंगभेदाग्रहस्य
च सत्वात्। किंचानुमितिप्रतिभेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवद्भेदाग्रहादनुमि
तिर्निराबाधा। यदि च विशिष्टज्ञानं कारणं तदा योगोलके वह्निव्याप्यधूमज्ञानं अनुमित्यनु
रोधादापतितां सेयमुभयतः पाशा रज्जुः इत्थं चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणं रंगे रज
त तथा ज्ञानामीत्यनुभवादिति संक्षेपः। पूर्वं व्याप्तिरुक्ता तद्ग्रहो यापस्तु न दर्शित इत्यतस्तं द
दर्शयति। व्यभिचारस्येति। व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणमित्यर्थः।
व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबंधकत्वात्। तदभावः कारणं। एवमन्वयव्यतिरेका
भ्यां सहचारज्ञानस्यापि हेतुता भूयोदर्शनं तु न कारणं। व्यभिचारास्फूर्तौ सकृद्दर्शने
पि क्वचिद्व्याप्तिग्रहात् क्वचिद्व्यभिचारशंकाविधूननद्वारा भूयोदर्शनमुपयुज्यते। यत्र तु
भूयोदर्शनादपि शंका नापैति तत्र विपक्षबाधकस्तर्कोपेक्षितस्तथा हि वह्निविरहिण्यपि

धूमस्यादिति यद्याशंका भवति तदा सा वह्निधूमयोः कार्यकारणभावस्य प्रतिसंधानान्नि
वर्त्तते। यद्ययं वह्निमान्न स्यात्तदा धूमवान्न स्यात्कारणं विना कार्यानुत्पत्तेः। यदि च क्वचि
त्कारणं विनापि भविष्यति अहेतुक एवाभविष्यति इति तत्राप्याशंका प्रभवति तदा सा व्या
घातादपसारणीया यदि कारणं विना कार्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य नियम
तउपादानं तवैव न स्यादिति। यत्र स्वत एव शंकां न वितरति। तत्र न तर्कापेक्षापीति तदिदमुक्तं त
र्कः क्वचिच्छंकानिवर्त्तक इति। इदानीमुपाधिं निरूपयति। साध्यस्येति। साध्यत्वाभिमतव्यापक
त्वे सति साधनत्वाभिमताव्यापक इत्यर्थः। ननु श्यामो मित्रातनयत्वादित्यत्र शाकपाकज
त्वं नोपाधिः स्यात्तस्य साध्यव्यापकत्वाभावात्। श्यामत्वस्य पटादावपि सत्वादेवं वायुः प्र
त्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्वं नोपाधिः स्यात्प्रत्यक्षत्वस्यात्मादौ सत्वा
त्तत्र च रूपाभावात्। एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्यात्तद्विनाशि

वपि

त्वस्य प्राग्भावे सत्वात्तत्र च भावत्वाभावादिति चेन्न। यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्माव
च्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात्। मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शा
कपाकजत्वं बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकं उद्भूतरूपवत्वं बहिर्द्रव्यत्वावच्छिन्न
साधनस्याव्यापकं च। एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भा
वत्वं। सद्धेतौ तु एतादृशधर्मो नास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नसाधनस्य
चाव्यापकं किंचित्स्यात्। व्यभिचारिणि तु उपाध्यधिकरणं यत्साध्याधिकरणं पञ्चोपाधिशू
न्यं साध्यव्यभिचारनिरूपकमभिकरणं। अत तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापक
त्वं साधनस्य चाव्यापकत्वमुपाधेः संभवतीति। अत एवैवं क्षेमप्युपाधिस्वरूपमेतदनुसारे
णदर्शयति। सर्व इति स्वसाध्येति। स्वं मुपाधिं स्वं च साध्यं च स्वसाध्ये तयोर्व्यभिचारितेत्य
र्थः। उपाधेर्दूषकताबीजमाह। व्यभिचारस्येति उपाधिसाध्यव्यभिचारानुमानमुपाधेः

व्यभिचारेण

७३

प्रयोजनमित्यर्थः॥ तथाहि यत्र शुद्धसाध्यव्यापक [illegible] तत्र शुद्धेनोपा
पाधिव्यभिचारेण साध्यव्यभिचारानुमानं। यथा धूमवान्वह्नेरित्यादौ वह्निर्धूमव्यभिचा
री आर्द्रेंधनव्यभिचारित्वात्। इति व्यापकव्यभिचारिणो व्याप्यव्यभिचारानवश्यकत्वात्।
यत्र किंचिद्धर्मावच्छिन्नसाध्यस्य व्यापकः उपाधिस्तत्र तद्धर्मवति उपाधिव्यभिचारेण साध्य
व्यभिचारानुमानं। यथा स श्यामो मित्रातनयत्वादित्यादौ मित्रातनयत्वं श्यामत्वव्यभिचा
रि मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति। बाधानुन्नीतपक्षेतरस्तु साध्यव्याप
कताग्राहकप्रमाणाभावात्। स्वव्याघातकत्वाच्च नोपाधिः। बाधोन्नीतस्तूपाधिर्भवत्ये
व यत्र वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नेरुष्णत्वग्रहेण वह्नीतरत्वमुपाधिः। य
स्य तूपाधेः साध्यव्यापकत्वादिकं संदिह्यते स संदिग्धोपाधिः पक्षेतरस्तु संदिग्धोपाधिरपि
नोद्भावनीयः। कप्यकसंप्रदायानुरोधादिति। केचित्तु सत्प्रतिपक्षोत्थापनमुपाधेः फलं।

७३

कं

तथाहि। अयोगोलकं धूमवद्वह्नेरित्यादौ अयोगोलकं धूमाभाववत्। आर्द्रेंधनाभावादिति सत्प्रति
पक्षसंभवादित्थं च साधर्म्यव्यापकोपि क्वचिदुपाधिः यथा करका पृथिवी कठिनसंयोगवत्वा
दित्यादौ अनुष्णाशीतस्पर्शवत्वं। न चात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यं। सर्वत्रोपाधेर्दूष
णांतरस्याकर्यादत्र साध्यव्यापकः पक्षावृत्तिरुपाधिरित्याहुः। शब्दोपमानयोरिति। वैशेषि
काणां मते प्रत्यक्षानुमानं च प्रमाणं शब्दोपमानयोरनुमानविधयैव प्रामाण्यं तथाहि दंडेन
ग्रामभ्याजेति पदानि तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकानि। आकांक्षादिम
त्पदकदंबकत्वात् घटमानयेति पदकदंबवत्। यद्वा एते पदार्थाः मिथः सर्गवंतः योग्य
योग्यतादिमत्पदोपस्थापितत्वात्। तादृशपदार्थवत्। दृष्टांतेपि दृष्टांतांतरेण साध्यसिद्धि
रिति। तन्न सम्यगिति। व्याप्तिज्ञानं विनापि शाब्दबोधस्यानुभवसिद्धत्वात्। नहि सर्वत्र शब्द
श्रवणानंतरं व्याप्तिज्ञाने मानमस्तीति किंच सर्वत्र यदि शब्दस्थले व्याप्तिज्ञानं कल्प्यते तदा

२ तन्मतं दूषयति। तन्न सम्यगिति २

वैदिकपदा ५
निवा ५

सर्वत्रानुमितिस्थलेपदज्ञानं कल्पयित्वा शाब्दबोध एव किन्न स्वीक्रियते इति। द्वैविध्यमि
ति। अनुमानं हि त्रिविधं केवलव्यतिरेकि अन्वयव्यतिरेकिभेदात्। तत्र असद्विपक्षः केव
लान्वयी। यथा ज्ञेयमभिधेयत्वादित्यादौ। तत्र हि सर्वस्यैव ज्ञेयत्वाद्विपक्षासत्वं। असत्स
पक्षः केवलव्यतिरेकी यथा पृथिवी इतरेभ्यो भिद्यते गंधवत्वादित्यादौ। तत्र हि जलादित्र
योदशभेदस्य पूर्वमसिद्धतया निश्चितसाध्यवतः सपक्षस्याभाव इति। सत्सपक्षविपक्षो
न्वयव्यतिरेकी। यथा वह्निमान्धूमादित्यादौ। तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्र
दादेश्च सत्वादिति। तत्र हि व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्या
प्तिं निर्वक्ति। साध्याभावेति। साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः। अत्रेदं
बोध्यं। येन संबंधेन यत्र येन रूपेण व्यापकता गृह्यते तत्संबंधावच्छिन्नप्रतियोगिताक
तद्धर्मावच्छिन्नाभाववत्ताज्ञानात् यत्संबंधेन यदवच्छिन्नं प्रति व्याप[illegible] गृह्यते तत्संबंधा

ता १ गि २

७४

वच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरित्थं च यत्रेतरत्वव्यापकत्वं गंधाभावे गृ
ह्यते। तत्र गंधाभावाभावेनेतरत्वात्यंताभावः सिध्यति। यत्र तु तादात्म्यसंबंधेनेतरव्याप्य
ता गृह्यते तत्र तादात्म्यसंबंधेनेतरस्याभावः सिध्यति स एवान्योन्याभावः। एवं यत्र संयोग
संबंधेन धूमं प्रति संयोगसंबंधेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसंबंधावच्छिन्नप्र
तियोगिकवह्न्यभावेन जलह्रदे संयोगसंबंधावच्छिन्नप्रतियोगिताकधूमाभावः सिध्य
ति। अत्र च व्यतिरेकव्याप्तिज्ञाने व्यतिरेकसहचारज्ञानं कारणं केचित्तु व्यतिरेकसहचारे
णान्वयव्याप्तिर्गृह्यते न तु व्यतिरेकव्याप्तिज्ञानं कारणं। यत्र व्यतिरेकसहचारात्व्याप्तिग्रह
स्तत्र व्यतिरेकीत्युच्यते। साध्यप्रसिद्धिस्तु घटादावेव ज्ञाता पश्चात्पृथिवीत्वावच्छेदेन साध्य
ते इति वदंति। अर्थापत्तेति। अर्थापत्तिं प्रमाणांतरं केचन मन्यंते। तथा हि यत्र देवदत्तस्य शतव
र्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनो गृहासत्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीवित्वा

न्यथानुपपत्याबहिःसत्वंकल्प्यतेतदप्यनुमानेनगतार्थत्वान्नेष्यते।जीवित्वस्यबहिः
सत्वस्येंगृहसत्वान्यतरव्याप्यत्वंगृहीतंतत्रान्यतरासिद्धौजायमानायांगृहसत्वबाधा
द्बहिःसत्वमनुमितौभासतेऽपीनोदेवदत्तोदिवानक्तंचूर्त्यादौपीनत्वस्यभोजनव्या
प्यत्वावगमाद्भोजनंसिध्यद्दिवाभोजनबाधेरात्रिभोजनंसिध्यतीतिचेष्टापिनप्रमाणं
तरं।तस्याःसंकेतग्राहकशब्दस्मारकत्वेनलिंगांसमशीलत्वाच्छब्दएवांतर्भावात्तस्य ६५
नुव्याख्यादिग्रहस्तत्रानुमितिरेवेति।सुखंनिरूपयति।सुखंत्विति।काम्यमभिलाष
विषयः।धर्मेति।धर्मत्वेनसुखत्वेनकार्यकारणभावइत्यर्थः।दुःखंनिरूपयति।अध
र्मेति।अधर्मत्वेनदुःखत्वेनकार्यकारणभावः।प्रतिकूलेति।सर्वेषांस्वाभाविकद्वेषवि
षयइत्यर्थः।इच्छांनिरूपयति।निर्दुःखत्वइति।इच्छाहिफलविषयणीउपायविषयिणी
वा।फलंसुखंदुःखाभावश्चतत्रफलेच्छांप्रतिफलज्ञानंकारणं।अतएवफलंपुरुषा

र्थःसंभवति।यज्ज्ञानंसत्स्ववृत्तितयाइष्यतेऽइतरेच्छानधीनेच्छाविषयत्वंफलितार्थःउपा ध२
येच्छांप्रतिइष्टसाधनताज्ञानंकारणंचिकीर्षेति।कृतिसाध्यत्वप्रकारिकाकृतिसाध्यक्रियाविष
यिणीच्छाचिकीर्षापाकंकृत्वासाधयामिइतितदनुभवात्।चिकीर्षांप्रतिकृतिसाध्यताज्ञा
नंनेष्टा।अतएवदक्षाद्यौकृतिसाध्यताज्ञानाभावान्नचिकीर्षाबलवद्विष्टेति।बलवद्विष्टसा
धनताज्ञानंतत्रप्रतिबंधकंबलवद्द्वेषःप्रतिबंधकइत्यभ्युपेत्यतदहेतुत्वरतिःबलवदनि
ष्टजनकत्वज्ञानंकारणमित्यर्थः।द्वेषंनिरूपयतिःद्विष्टेति।बलवद्विष्टसाधनताज्ञानं
कारणंतेननांतरीयकदुःखजनकेपाकादौनदूषः।यत्नंनिरूपयतिःप्रवृत्तिश्चेति।प्रवृत्ति
निवृत्तिजीवनयोनियत्नभेदात्यत्नस्त्रिविधइत्यर्थः।चिकीर्षेति।मधुविषसंपृक्तान्नभो
जनादौबलवदनिष्टानुबंधित्वेनचिकीर्षाभावान्नप्रवृत्तिरितिभावः।कृतिसाध्यताज्ञाना
दिबलवदनिष्टाननुबंधित्वज्ञानमपिस्वतंत्रान्वयव्यतिरेकात्प्रवृत्तौकरणमित्यपिवदं

ति। कार्यताज्ञानं प्रवर्तकमिति गुरवः। तथाहि ज्ञानस्य प्रवर्तकत्वे जननीयायां चिकीर्षातिरिक्तनापेक्षि
तमस्ति। चिकृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात्। चिकीर्षा
हि कृतिसाध्यत्वप्रकारिकेच्छा तत्र कृतिसाध्यत्वप्रकारस्तत्प्रकारकं ज्ञानं चिकीर्षायां तद्वारा प्र
वृत्तौ च हेतुः। नन्विष्टसाधनताज्ञानं तत्र हेतुः कृत्यसाध्येपि प्रवृत्त्यापत्तेः। कृत्यसाध्यताज्ञानं
प्रतिबंधकमिति चेन्न। तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात्। नवद्वयोरेव हेतुत्वं गौ
रवात्। नन्वुन्मत्तोपि मधुविषसंपृक्तान्नभक्षणे चैत्यवदनेव प्रवृत्त्यापत्तिः। कार्यताज्ञानस्य
प्रवर्तकादिति चेन्न। स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात्काम्ये
ष्टियागपाकादौ कामनापुंविशेषणं तत्तश्च बलवदनिष्टानुबंधिकाम्यसाधनताज्ञानेनका
र्यताज्ञानतः प्रवृत्तेः। उन्मत्तश्चौदनेन प्रवर्तते। तदानीं कामनायाः पुरुषविशेषणत्वाभावा
त्। नित्ये च सौचादिकं पुरुषविशेषणं। तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानतत्र प्रवृत्तिः

ननु तदपेक्षयालापवेन बलवदनिष्टाननुबंधीष्टसाधनताज्ञानमेव हेतुरस्तु। बलवदनिष्टाननु
बंधित्वं चेष्टोत्पत्तिनांतरीयकेदुःखजनकत्वं। बलवद्द्वेषविषयदुःखजनकत्वं वेति चेन्न। इष्टसा
धनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात्। साध्यत्वसाधनत्वयोर्विरोधात्। असिद्धस्य
हि साध्यत्वं सिद्धस्य साधनत्वं नन्वेकमेकेनैकदासिद्धं मसिद्धं चेति ज्ञायतेः तस्मात्कालभेदादुभ
यं ज्ञायतमिति। मैवं। लघवेन बलवदनिष्टाननुबंधीष्टसाधनत्वेसति कृतिसाध्यताज्ञानस्य हेतु
त्वात्। न च साध्यत्वसाधनत्वयोर्विरोधः। यत्कदाचित्साध्यत्वसाधनत्वयोरविरोधात्। य
त्कदासाध्यत्वसाधनत्वयोरज्ञानात्। नवीनास्तममेदं कृतिसाध्यमिति ज्ञानं प्रवर्तकमना
गतेतस्यज्ञातुमशक्यत्वात्। किंतु यादृशस्य पुंसः कृतिसाध्यं यदृष्टं तादृशं स्वस्य प्रतिसं
धायतत्र प्रवर्तते। तेनोदनकामस्यतत्साधनताज्ञानवतः नडुपकरणवतः पाकः कृतिसाध्य
स्तादृशश्चाहमिति प्रतिसंधायपाके प्रवर्ततइत्याहुः तन्नाः स्वकल्पितलिप्यादिप्रवृत्तौ यौवने

कामोद्भेदादिनासंभोगादौतदभावात्।इदंतु बोध्यं।इदानीमिष्टसाधनत्वादिज्ञानंप्रवर्त्तकं।तेन
भावियौवराज्येबालस्यनप्रवृत्तिः।तदानींकृतिस्यध्यत्वाज्ञानात्।एवंतृप्तोभोजनेनप्रवर्त्तते।
तदानीमिष्टसाधनत्वाज्ञानात्।प्रवर्त्ततेचरोषदूषितचित्तोविषादिभक्षणेतदानींबलवदनिष्टान
नुबंधित्वज्ञानात्।नचास्तिकस्यागम्यागमनेशत्रुवधादिप्रवृत्तौकथंबलवदनिष्टाननुबंधित्व
बुद्धिर्नरकसाधनत्वज्ञानादितिवाच्यं।उत्कटरागादिनानरकसाधनताधीतिरोधानात्।वृष्ट्यादौ
तुकृतिसाध्यताभावान्नचिकीर्षाप्रवृत्तीकिंत्विष्टसाधनताज्ञानादिच्छामात्रं।कृतिश्चप्रवृत्तिरू
पाबोध्या।तेनजीवनयोनियत्नसाध्येप्राणपंचकसंचारेनप्रवृत्तिः।इत्थंचप्रवर्त्तकानुरोधाद्विधे
रपितावानर्थः।इत्थंचविश्वजितायेजेतेत्यादौयत्रफलनश्रूयतेतत्रापिस्वर्गःफलंकल्प्यते।न
न्वहरहःसंध्यामुपासीतइत्यादाविष्टानुत्पत्तेःप्रवृत्तिकथं।नचार्थवादिकब्रह्मलोकादिःप्रत्य
वायाद्यभावोवाफलमितिवाच्यं।तथासतिकाम्यत्वेनित्यत्वहान्यापत्तेःकामनाभावेअकर

णापत्तेः।इत्थंचफलश्रुतिस्तत्रार्थवादइतिचेन्न।ग्रहणश्राद्धादौनित्यत्वनैमित्तिक
त्वयोरिवकाम्यनित्ययोरप्यविरोधात्।नचकामनाभावेत्करणापत्तिस्त्रिकालस्त
वपाठादाविवकामनासद्भावेस्यैवकल्पनात्।नतुवेदबोधितकार्यताज्ञानात्प्रवृत्ति
संभवतिस्वेष्टसाधनत्वमज्ञायतादृशकार्यताज्ञानसहस्रेणापिप्रवृत्तेरसंभवात्।य
दपिपंडापूर्वंफलमितितदपिनःकामनाभावादकरणापत्तेस्तौल्यात्।कामनाक
ल्पनेत्वर्थवादिकफलमेवरात्रिसत्रज्ञायेनकल्प्यतां।अन्यथाप्रवृत्त्यनुपपत्तेः।
संध्यामुपासतेचसततंशंसितव्रताः।विधूतपापास्तेयांतिब्रह्मलोकमनामयं।
एवंदद्यादहरहःश्राद्धंपितृभ्यःप्रीतिमावहन्नित्यादिप्रीत्यात्मकमेवफलमस्तु।
नचपितृप्रीतिःकथंफलंव्यधिकरत्वादितिवाच्यं।गयाश्राद्धादाविवोद्देश्यत्वसंबंधे
नैवफलजनकत्वस्यैवक्वचित्कल्पनात्।अतएवोक्तंशास्त्रदेशिनंफलमनुष्ठात

रीतिउत्सर्गइतिपितॄणामुक्तत्वे तुस्वस्यस्वर्गादि-फलंयावन्नित्यनैमित्तिकानुष्ठा
नस्यसामान्यतःस्वर्गफलकत्वात्।पंडापूर्वार्थं हिप्रवृत्तिश्चनसंभवतिनहितत्सु
खदुःखाभाववत्स्वतःपुरुषार्थः।नवातत्साधन-प्रत्यवायानुत्पत्तौकथंप्रवृत्तिरिति
चेत्।इत्थंयथाहिनित्येकृतेप्रत्यवायाभावस्तिष्ठतितदभावेतदभावः।एवंप्रत्यवा
याभावसत्वेदुःखप्राग्भावसत्वंतदभावेतदभावइतियोगक्षेमसाधारणकारण
तायाःदुःखप्राग्भावंप्रत्यपिसुवचत्वात्।एवमेवप्रायश्चित्तस्यापिदुःखप्राग्भाव
हेतुत्वमिति।ननुनकलंजंभक्षयेदित्यत्रविध्यर्थेकथंनञर्थान्वयः इष्टसाधनस्या
भावस्यबोधयितुमशक्यत्वादितिचेन्न।तत्रबाधादिष्टसाधनत्वंकृतिसाध्यत्वंच
नविध्यर्थः।किंतुबलवदनिष्टाननुबंधित्वमात्रंतदभावश्चनयांबोध्यते अथवा
बलवदनिष्टाननुबंधीष्टसाधनत्वेसतिकृतसाध्यत्वंविध्यर्थः।तदभावश्चनत्रा

ध्यमानोविशिष्टाभावोविशेष्यवतिविशेषणाभावेविश्राम्यति।ननुश्येनाभिचरन्य
जेतेत्यत्रकथंबलवदनिष्टाननुबंधित्वमर्थः।श्येनस्यमरणानुकूलव्यापारस्यहिं
क सात्वेननरकसाधनत्वात्।नचवैधत्वान्नविषेधइतिवाच्यं।अभिचारेप्रायश्चित्तो
पदेशात्।नचमरणानुकूलव्यापारमात्रपहिंसानदारवद्गकास्यकूपकर्तुश्चहिं
हिंसकत्वापत्तिः।गललनभक्षणजन्यमरणेअत्मवधत्वापत्तिश्चेतिवाच्यं।मरणो
द्देशकस्यापिविशेषणात्।अन्योद्देश्यकक्षिप्तनाराचहतब्राह्मणस्यतुवाचनिकंप्रा
यश्चित्तमिचन्न।शेनवारणायादृष्टाद्वारकत्वेनविशेषणात्।अतएवकाशीमरणार्थं
कृतशिवपूजादेवपिनहिंसात्वंनचसाक्षान्मरणजनकस्यैवहिंसात्वंश्येनस्यहिंसाफ
लंनतमरणंतेनश्येनजन्यखड्गघाताद्दिरूपाहिंसाभिचारपदार्थः।तस्यचपापजनक
त्वमतःश्येनस्यवैधत्वात्पापजनकत्वेपिअग्रिमपापंप्रतिसंधायसंतोनप्रवर्तंते।आ

चार्यास्तु आप्ताभिप्रायविध्यर्थः। पाकं कुर्यादित्यादौ आज्ञादिरूपेच्छावाचित्ववल्लिङ्मात्र
स्येच्छावाचित्वं लाघवादेवं च स्वर्गकामो यजेतेत्यादौ यागः स्वर्गकामं कृतिसाध्यत आप्तेष्ट इ या २
त्यर्थः। ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्त्तते॥ कलंजभक्षदौ तदभावान्न
प्रवर्त्तेते। यस्तु वेदपौरुषेयत्वं नाभ्युपैति तं प्रति विधिरेव तावद्गर्भ इव श्रुतिः कुमार्याः
पुयोगमानं न च कर्तृस्मरणं बाधकपिलकणादादिमारभ्यापर्यंतं कर्तृस्मरणस्यैव प्रतीय
मानत्वात्। अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः। तत्रैव कर्तृस्मरणमस्तीति चेद्वेदेपि छं
दांसि जज्ञिरे तस्मादिति कर्तृस्मरणमस्त्येव एवं प्रतिमन्वंतरं चैषाश्रुरन्या विधीयत
— पि द्रष्टव्यं। स्वयंभूरेष भगवान्वेदो गीतस्त्वया पुरा। शिवाशिवायास्सषिपर्यंताः स्म
र्तारोस्य न कारका इति तु वेदस्य स्तुमात्रं। न च पौरुषेयत्वं भ्रमादिसंभवादप्रामाण्यं स्या
दिति वाच्यं नित्यसर्वज्ञत्वे निषेधित्वादत एव पुरुषांतरस्य भ्रमादिसंभवान्न कपिलादिक
दि

तृत्वं वेदस्य किं च वर्णानामेवानित्यत्वस्य वक्ष्यमाणत्वात्। सुतरां वेदस्यानित्यत्वमिति।
उपादानस्य समवायिकारणप्रत्यक्षप्रवृत्तौ कारणमिति निवृत्तिरिति। द्विष्टिसाधन
ताज्ञानस्य निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधातमिति भावः। यत्न इ
ति। जीवनयोनियत्नो याज्जीवनमनुवर्त्तते स चातींद्रियः। तत्र प्रमाणमाह। शरीर इति।
प्राणसंचारो हि अधिकश्वासादिः प्रयत्नसाध्यः इत्थं च प्राणसंचारस्य सर्वस्य य
त्नसाध्यत्वानुगमात्। प्रत्यक्षयत्नबाधाच्चातींद्रियसिद्धिः स एव जीवनयोनिय
त्नः। गुरुत्वं निरूपयति। अतींद्रियमिति। अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यत्वं नि
रूपयति॥ सांसिद्धिकमिति। द्रव्यत्वं द्विविधं। सांसिद्धिकं नैमित्तिकं चेति। द्वितीयं नैमि
२ ×त्ये परमाणौ नित्यं। गुरुत्वमनुवर्त्तते। तद्गुरुत्वसमवायि। असमवायिकारणं। पतने × २
ति। आद्यपतनेत्यर्थः। द्र २

त्तिकं परमाण्वादाविति। जलपरमाणौ द्रवत्वं नित्यं। अन्यत्र पृथिवीपरमादौ जलद्व्य
णुकादौ द्रवत्वं मनित्यं। कुत्र चित्तेजसि कुत्रचित्पृथिव्यां नैमित्तिकं। को वा नैमित्तिका
र्थस्तं दर्शयति। नैमित्तिकमिति। अग्निसंयोगजन्यं नैमित्तिकद्रवत्वं च सुवर्णादिरूप
तेजसि घृतजतुप्रभृति पृथिव्यां च वर्त्तते। हेतुरिति। असवायिकारणमित्यर्थः। सं
महे सक्तुकादिसंयोगविशेषे तत्तद्रवत्वं स्नेहसहितमिति बोध्यं। तनद्गुनसुवर्णा
दिना न संग्रहः। स्नेहं निरूपयति। स्नेह इति जल इति। जल एवेत्यर्थः सस्नेहः। न
तु पृथिव्यामपि तैले स्नेह उपलभ्यते। न चासौ जलीयस्तथा क्षतिदहनप्रातिकूल्य
प्रसंगादत आह। तैलातर इति। तत्प्रकर्षात्। तैलोपलभ्यमानस्नेहोपि जलीय ए
व तस्य प्रकृष्टत्वादग्नेरानुकूल्यं। अपकृष्टस्नेहं हि जलं वह्निर्निनाशयतीति भा
वः। संस्कारं निरूपयति। संस्काभेद इति। वेगस्थितिस्थापकभावनाभेदात्। संस्का

रस्त्रिविध इत्यर्थः। कर्मज इति। वेगो द्विविध इत्यर्थः। शरादौ हि नोदनजनितेन पूर्वकर्मणा
वेगो जायते। तेन च पूर्वनाशः तदुत्तरं कर्म। एवमग्रेपि विनापि वेगं कर्मणः कर्मप्रतिबंध
कत्वात्पूर्वकर्मनाश उत्तरकर्मोत्पत्तिश्च न स्यात्। यत्र च वेगता कपालेन जनितघटे वे
गो जन्यते वेगः स्थितिस्थापकेति। आकृष्टशाखादीनां परित्यागे पुनर्गमस्य। स्थिति
स्थापकसाध्यत्वात्। केचिदिति। चतुर्षु क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यते त
दप्रमाणमिति भावः। तत्स्थितिस्थापकं क्वचिदाकृष्टशाखादौ। भावनाख्य इति। तस्य सं
स्कारस्य उपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेरुपेक्षानात्मकेत्युक्तं तत्संशयास्मृत्यनुत्प
त्तेर्निश्चय इत्युक्तं। तेनोपेक्षान्यनिश्चयत्वेन संस्कारप्रतिहेतुतेति भावः। ननु स्मरणं प्र
ति उपेक्षान्यनिश्चयत्वेन हेतुत्वेन हेतुत्वं तेनोपेक्षादिस्थलेन स्मरणं। इत्थं च संस्का
रे प्रतिज्ञानत्वेन हेतुतास्तु इति चेन्न। विनिगमनाविरहेपि संस्कारे उपेक्षान्यनिश्चय

त्वेनहेतुतायाअसिद्धत्वात्। किंचोपेक्षास्थलेसंस्कारकल्पनायाः गुरुत्वात् संस्कारं
प्रतिउपेक्षान्यत्वेनहेतुतायाः सिद्धत्वात् असौ संस्कारस्तत्रप्रमाणंदर्शयति। स्मर
रणइति। यतः स्मरणंप्रत्यभिज्ञानंजनयति। अतः संस्कारः कल्पतेविनाव्यापार
पूर्वानुभवस्यस्मरणादिजननासामर्थ्यात्। स्वस्यव्यापाराभावेकारणंत्वासंभवा
त्। नत्वप्रत्यभिज्ञांप्रतितत्संस्कारस्यहेतुत्वेप्रत्यभिज्ञायाः स्वस्कारजन्यत्वेनस्म
तित्वापत्तिरितिवाच्यं। अप्रयोजकत्वात्· परंतुअनुद्भूतसंस्काराअत्यभिज्ञांनुदयादु
द्बुद्धसंस्कारस्यहेतुत्वापेक्षयातत्तत्स्मरणस्यैवप्रत्यभिज्ञांप्रतिहेतुत्वंकल्पतेइत्या
ऊः। अदृष्टंनिरूपयति। धर्माधर्माविति। स्वर्गादिसकलसुखानांस्वर्गसाधनीभूत
शरीरादीनांचसाधनंधर्मइत्यर्थः। तत्रप्रमाणंदर्शयितुमाह। यागादीति। यागादि
व्यापारतयाहिधर्मः कल्प्यते। अन्यथायागादिचिरविनष्टतयानिर्व्यापारतयाचका

लांतरभाविस्वर्गजनकत्वंनस्यात्। तदुक्तंमाचार्यैः। चिरध्वस्तंफलायालंनकर्मातिस
र्यंविना। ननुयागध्वंसएवंव्यापारःस्यात्। नचप्रतियोगिध्वंसयोरेकत्राजनक
त्वंसर्वत्रतथात्वेमानाभावादित्यतआह। गंगास्नानादिति। गंगास्नानस्यहिस्वर्गजन
कत्वेनअनंतानांजलसंयोगध्वंसानांव्यापारत्वमपेक्ष्यैकमेधापूर्वकल्पतेलघवादि
तिभावः। ननुध्वंसोपिनव्यापारः। नचनिर्व्यापारस्यचिरध्वस्तस्यैकथंकारणत्वमि
तिवाच्यं। अनान्यथासिद्धनियतपूर्ववर्तित्वस्यतत्रापिसत्वात्। अव्यवहितपूर्ववर्ति
त्वंचक्षुःसंयोगादेःकारणत्वंनतुसर्वत्रकार्यकालवर्तित्वमिवसमवायिकारणेत्वे
इत्यतआह। कर्मनाशेति। यदिहिअपूर्वंनस्यात्तदाकर्मनाशाज्जलस्यशीतादिनाना
रम्यत्वंधर्म्यस्यनस्यान्नहितेनयागादिनाशः प्रतिबंधोवाकर्तुरिति तेनस्यपूर्वमेवप्रत्य
क्षत्वादिति। नरकादीनामिति। नरकदुःखादिसकलदुःखानांनारकिशरीरादीनां

वसाधनधर्मइत्यर्थः। प्रमाणमाह। प्रायश्चित्तादिनाश्यइति। यदिहि अधर्मो नस्यात्तदाप्रा
यश्चित्तादिनाश्यत्वंनत्। नहितनब्रह्महननादेर्नाशः प्रतिबंधोवाविधातुंशंस्यतेतस्य
पूर्वविनष्टत्वादितिभावः। जीवेति। ईश्वरस्यधर्माधर्माभावादितिभावः। इमौधर्माधर्मौ
वासनेति। अतोज्ञानिनाकृतेपिसुकृतदुःकृतेकर्मणांनफलायालमितिभावः। ज्ञानादपी
ति। अपिनाभोगसंग्रहः। ननुतत्वज्ञानस्यकथंधर्माधर्मनाशकत्वं। नाभुक्तंक्षीयतेकर्म
कल्पकोटिशतैरपीतिवचनविरोधात्। इत्थंचतत्वज्ञानिनांसटितिकायव्यूहेनसक
मणांभोगेक्षयइतिचेन्न। तत्रभोगस्यवेदबोधितनाशकोपलक्षकत्वात्। कथमन्यथा
प्रायश्चित्तादिनाकर्मणांनाशः। तदुक्तं। ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेर्जुनेति।
तथेति। क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे। ननुतत्वज्ञानिस्तर्हिशरीरवस्थानंसुदुः
खादिचनस्यात्। ज्ञानेनसर्वेषांकर्मणांनाशादितिचेन्न। प्रारब्धेतरकर्मणामेवनाशादि

ति। तच्छरीरेभोगजनकंहियत्कमतत्प्रारब्धंतदभिप्रायमेवनामुक्तमितिवचनमिति।
शब्दंनिरूपयति। शब्दइतिनभोवृत्तिराकाशसमवेतः दूरस्थशब्दस्यागृहणादा
ह। श्रोत्रेति। ननुमृदंगाद्यनच्छेदेनोत्पन्नशब्देश्रोत्रेकथमुत्पत्तिरतिआह। वीचीति। आ
पशब्दस्यबहिर्दशदिगवच्छिन्नोन्यः शब्दस्तेनैवशब्देनजन्यते। सचाद्यशब्द[illegible]
तैतैश्चान्यइतिभावः। अस्मिन्कल्पेगौरवव्यापकएवंक्रमेणश्रोत्रोत्पन्नउपलभ्यतइति।
कदंबेति। आद्यशब्दाद्दशदिक्षुदशब्दाउत्पद्यंतेतैश्चान्येदशब्दाउत्पद्यंतेतैश्चान्येइति
भावः। अस्मिन्कल्पेगौरवादुक्तं। कस्यचिन्मतेइति। ननुशब्दस्यनित्यत्वादुत्पत्तिकथ
नमसंगतमतआह। उत्पन्नइति। शब्दानामुत्पविनाशशालित्वादनित्यत्वमित्यर्थः।
ननुसएवायककारःइत्यादिप्रत्यभिज्ञाच्छब्दानांनित्यत्वंइत्थंचउत्पादविनाशबुद्धि

मुक्ता॰

८४

667

भ्रमरूपैवेत्यत आह। सोयमिति। साजात्यमिति। तत्र प्रत्यभिज्ञानस्य हि तत्सजाती
यत्वं विषयो न तु तद्व्यक्त्यभेदे विषय उक्तप्रतीतिविरोधात्। इत्थं च द्वयोरपि बुध्या
र्नभ्रमत्वमिति। ननु सजातीये सोयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह। तदेवेति।
यदौषधमन्येन कृतं देवौषधमयापि कृतमित्यादिदर्शनादिति भावः॥ ॥इति श्री
महामोहोपाध्यायसिध्धांतपंचाननभट्टाचार्यकृतासिद्धांतमुक्तावलीसंपूर्णा॥ मा॰ मा॰ ५
॥पराडकारोपनामहरिभट्टेन लिखितं॥ कुलस्वामिलक्ष्मीकेशवाभ्यां नमः॥ छ॥ ॥
मुक्तावली भट्टगोपिनाथभट्टस्य पुस्तकं॥ लिखितं॥ छ॥ ॥छ॥ ॥छ॥ ॥
जटेयं नो वेणीकृतकचकलापो नगरलं गलेकस्तूरीयं न च जलधिजातं च गरलं॥ इयं
नांगे भूतिः प्रियविरहजन्माधवनिमापुरा तैरोभीत्या कुसुमशरकिं मां व्यथयति॥

रामकृष्णौ

८३